क नारायणोपनिषत् १

ख हंसोपनिषत् ३

ख ब्रह्मबिन्दूपनिषत्

ग ब्रह्मजनबिन्दूपनिषत् ३

घ मस्रोपनिषत् १

ङ परमहंसोपनिषत् १

च जाबालोपनिषत् ३

छ आरुणपनिषत् १

ज ब्रह्मोपनिषत् ३

झ गर्भोपनिषत् १

ञ हुबालोपनिषत् २

ट बृहज्जाबालोपनिषदि सर्वतापिनी ११

ठ बृहज्जाबालोप० उत्तरतापिनी १२

ड कालाग्निरुद्रोपनिषत् १

ढ कैवल्योपनिष० १

ण अथर्वशिरोपनि० २

त अथर्वशिरवोप० १

थ क्षुरिकोपनि० १

द चूलिकोपनि० १

२० ध योगशिखोपनिषत् २

हंसोपनिषत्
महोपनिषत्
परमहंसोपनिषत्
जाबालोपनिषत्
आरुण्योपनिषत्
ब्रह्मोपनिषत्
गर्भोपनिषत्
सुबालोपनिषत्
बृहज्जाबालोपनिषत्
कालाग्निरुद्रोपनिषत्
कैवल्योपनिषत्
अथर्वशिरोपनिषत्
क्षुरिकोपनिषत्
चूलिकोपनिषत्
योगशिखोपनिषत्

वेदांत

नारायण०
१

श्रीमहागणपतयेनमः श्रीगुरुभ्योनमः ॐभद्रं० शांतिः पुरुषोहवैनारायणोकामयत्तप्रजाःसृजेयेतिना
रायणाद्ब्रह्माजायतेनारायणादिंद्रोजायतेनारायणाद्द्वादशादित्यारुद्राःसर्वादेवताः सर्वाणिचभूतानिनारा
यणादेवसमुत्पद्यंतेनारायणेप्रलीयंतेअथनित्योदेवएकोनारायणोब्रह्माचनारायणःशिवश्चनारायणःश
क्रश्चनारायणोद्वादशादित्याश्चनारायणोवसवोश्विनौचनारायणःसर्वेऋषयोनारायणःकालश्चनाराय
णोदिशश्चनारायणोधश्चनारायणउर्ध्वंचनारायणोंतर्बहिश्चनाराणोनारायणएवेदंसर्वंयद्भूतंयच्चभव्यं॥
अथनित्योनिष्कलोनिराख्यातोनिर्विकल्पोनिरंजनःशुद्धोद्वितीयोनद्वितीयोस्तिकश्चिद्यएवंवेदतस्यनद्विती
योस्तिकश्चित्तरुद्रंससारथिंकृत्वामनःप्रग्रहवान्नरःप्रयातिपरमंपारंविष्णवाख्यंपदमव्ययंएतद्वैनारायणस्यो
पनिषदमधीतेससर्वेभ्योघोरेभ्योविमुक्तोभवतिससर्वांश्चिलोकानाप्नोतिब्रह्मत्वंचगत्वाम्रतत्वंचगच्छति॥ॐ
मित्यग्रेव्याहरेन्नमइतिद्वितीयमंतेचनारायणायेतिॐमित्येकाक्षरंनमइतिद्वेअक्षरेनारायणायेतिपंचाक्ष

राणिएतद्वैनारायणंस्याष्टाक्षरंपदं योहवैनारायणस्याष्टाक्षरंपदमध्येतिअनपब्रवः सर्वमायुरेतिरास्पोषं
गौपत्यंविंदंतेप्राजापत्यंततोमृतत्वमश्नुतेततोमृतत्वमश्नुते॥ इतिनारायणोपनिषत्समाप्ता॥ भद्रं०
शांतिः३ ॐ गौतमउवाच॥भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद॥ब्रह्मविद्याप्रबोधोहिकेनोपायेनजा
यते॥सनत्सुजातउवाच॥विचार्यसर्ववेदेषुमतंज्ञात्वापिनाकिनः पार्वत्याकथितंतत्वंशृणुगौतमतन्मम॥अना
ख्येयमिदंतत्वंयोगिनीकोशसन्निभं हंसस्यगतिविस्तारंभुक्तिमुक्तिफलप्रदं अथहंसपरमहंसनिर्णयंव्या
ख्यास्यामोब्रह्मचारिणेदांतायगुरुभक्तायहंसहंसेतिसदायंसर्वेषुदेहेषुव्याप्तोवर्ततेयथाह्यग्निःकाष्ठेषुतिले
षुतैलमिवतंविदित्वानमृत्युमेतिगुदमवष्टभ्याधाराद्वायुमुत्थाप्यस्वाधिष्ठानंत्रिःप्रदक्षिणीकृत्यमणिपूरकंगत्वा
नाहतमतिक्रम्यविशुद्धौप्राणान्निरुध्याज्ञामनुध्यायन्ब्रह्मरंध्रंध्यायन्त्रिमात्रोहमित्येवंसर्वदाध्यायअत्रतो
ग्रंथः अग्निमपत्रेपश्यस्तनागारस्वशिष्टोभयपार्श्वेभवतएषोसौपरमहंसोभानुकोटिप्रतीकाशोयेनेदंव्याप्तंन

स्याद्वधाद्वृत्तिर्भवंति पूर्वेदले पुण्ये मतिराग्नेय्यां निद्रालस्यादयो भवंति याम्ये क्रौर्ये मतिर्नैर्ऋत्ये पापे मनी
षा वारुण्यं क्रीडा वायव्ये गमनादौ बुद्धिः सौम्ये रतिप्रीतिरैशाने द्रव्यादाने मध्ये वैराग्यं केसरे जाग्रदवस्था कर्णिका
यां स्वप्नं लिंगे सुषुप्तिः पद्मत्यागे तुरीयं यदा हंसो नादे विलीनो भवति तदा तुर्यातीत — मथो नादमाधाराद्ब्रह्मरंध्र
पर्यंतं शुद्धस्फटिकसंकाशं स वै ब्रह्म परमात्मेत्युच्यते॥ अथ हंस ऋषिरव्यक्तगायत्री छंदः परमहंसो देवता हमि
ति बीजं स इति शक्तिः सोहमिति कीलकं षट् संख्ययाहोरात्रयोरेकविंशतिसहस्राणि षट्शतान्यधिकानि
भवंति सूर्याय सोमाय निरंजनाय निराभासाय तनुसूक्ष्म प्रचोदयादग्नीषोमाभ्यां वौषट् हृदयाद्यंगन्यासो भव
तः एवं कृत्वा हृदये ष्टदले हंसात्मानं ध्यायेदग्नीषोमौ पक्षावोंकारः शिरो विंदुस्तु नेत्रं मुखं रुद्रो रुद्राणी चरणौ बा
हू कालश्चाग्निश्चोभे पार्श्वे भवतः मुन्मनन मजपोपसंहारमित्यभिधीयते एवं सर्वं हंसवशात्तस्मान्मनो विचार्य
ते स एव जपकोट्या नादमनुभवत्येवं सर्वं हंसवशान्नादो दशविधो जायते चिणिति प्रथमं चिंचिणीति द्वितीयं

एम
२

टानादस्तृतीयः शंखनादश्चतुर्थः पंचमस्तंत्रीनादः षष्ठस्तालनादः षष्ठस्तालनादः स्यप्तमोवेणुनादोष्टमोभे
रीनादोनवमोमृदंगनादोदशमोमेघनादोनवमंपरित्यज्यसेतप्रथमेचिंचिणीगात्रंद्वितीयेगात्रभंजनं।तृती
येखेदनंयातिचतुर्थेकंपतेशिरः पंचमेस्रवतेतालुषष्ठेमृतनिषेवणं॥ समेगूढविज्ञानंपंरावाचातथाष्टमे॥
अदृश्यंनवमेदेहंदिव्यचक्षुस्तथामलं॥ रामंपरमंब्रह्मभवद्ब्रह्मात्मसन्निधो॥ तस्मिन्मनोविलीयतेमनसिग
तेसंकल्पविकल्पेदग्धेपुण्यपापेसदाशिवः शक्त्यात्मासर्वत्रावस्थितस्स्वयंज्योतिः शुद्धोबुद्धोनित्योनिरंजनः
शांतःप्रकाशतइत्येवंवेदप्रवचनंवेदप्रवचनमिति॥ इतिहंसोपनिषत्समाप्ता भद्रं॰शांतिः ॐ म् मनोहिद्वि
विधंप्रोक्तंशुद्धमेवच॥ अशुद्धंकामसंकल्पंशुद्धंकामविवर्जितम् मनएवमनुष्याणांकारणंबंधमोक्षयोः बं
धायविषयासक्तंमुक्तंनिर्विषयंस्मृतम्॥ यतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते॥ अतोनिर्विषयंनित्यंम
नःकार्यंमुमुक्षुणा॥ निरस्तविषयासंगंसंनिरुद्धंमनोहृदि॥ यदायात्यात्मनोभावंतदातत्परमंपदम्॥ तावदे

वनिरोद्धव्यंयावद्धृदिगतंक्षयम्॥एतज्ज्ञानंचध्यानंचअतोन्योग्रंथविस्तरः॥नैवचिंत्यनचाचिंत्यमेवनतत्॥पक्षपा
तविनिर्मुक्तंब्रह्मसंपद्यतेतदा॥स्वरेणसंधयेद्योगमस्वरंभावयेत्परम्॥अस्वरेणहिभावेनभावोनाभावइष्यते
॥तदेवनिष्कलंब्रह्मनिर्विकल्पंनिरंजनम्॥तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंपद्यतेध्रुवम्॥निर्विकल्पमनंतंचहेतुदृ
ष्टांतवर्जितम्॥अप्रमेयमनादिंचयज्ज्ञात्वामुच्यतेबुधः॥ननिरोधोनचोत्पत्तिर्नबंधोनचशासनं॥नमुमुक्षु
र्नमुक्तिश्चेदित्येषापरमार्थता॥एकएवात्मामंतव्योजाग्रत्स्वप्नसुषुप्तिषु॥स्थानत्रयव्यतीतस्यपुनर्जन्मनविद्य
ते॥एकएवहिभूतात्माभूतेभूतेव्यवस्थितः॥एकधाबहुधाचैवदृश्यतेजलचंद्रवत्॥घटसंवृतमाकाविंदूरं
नीयमानेघटेयथा॥घटोनीयेतनाकाशंतद्वज्जीवोनभोपमः घटवद्विविधाकारंभिद्यमानंपुनः॥तद्भग्नंनच
पुन
जानातिसजानातिचनित्यशः॥शब्दमायावृतोयावत्तावत्तिष्ठतिपुष्करे॥भिन्नेतमसिचैकत्वमेकएवानुपश्यति॥
शब्दाक्षरंपरंब्रह्मयस्मिन्क्षीणेयदक्षरम्॥तद्विद्वानक्षरंध्यायेद्यदिच्छेच्छांतिमात्मनः॥द्वेविद्येवेदितव्येतुशब्द

ब्रह्मपरं च यत् ॥ शाब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्वतः ॥ पलाल
मिव धान्यार्थी त्यजेद्ग्रंथमशेषतः गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ॥ क्षीरवत्पश्यते ज्ञानं लिंगिनस्तु गवां
यथा ॥ घृतमिव पयसि निगूढं भूते भूते वसति विज्ञानम् ॥ सततं मथयितव्यं मनसा मंथानभूतेन ॥ ज्ञाननेत्रं स
मादाय चरेद्वह्निमतः परम् ॥ निष्कलं निश्चलं शांतं तद्ब्रह्माहमिति स्मृतम् ॥ सर्वभूताधिवासं यद्भूतेषु च वसंत्यद्भूषी
सर्वानग्राहकत्वेन तदस्म्यहं वासुदेवस्तदस्म्यहं वासुदेव इति ॥ इति ब्रह्मबिंदूपनिषत्समाप्ता ॐ भद्रं॰ शांतिः ॥
ॐ मूः शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ॥ परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥ ॐकाररथमारु
ह्य विष्णुं कृत्वाथ सारथिम् ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥ तावद्रथेन गंतव्यं यावद्रथपथिस्थितिः स्थि
ता रथपथस्थानं रथमुत्सृज्य गच्छति मात्रालिंगपदं त्यक्त्वा शब्दव्यंजनवर्जितम् ॥ अस्वरेण मकारेण पदं सूक्ष्मं हि ग
च्छति शब्दादिविषयाः पंच मनश्चैवातिचंचलम् । चिंतयेदात्मनो रश्मीन्प्रत्याहारः स उच्यते प्रत्याहारस्तथा

हं.सो.प्र॰
४

ध्यानं प्राणायामोथ धारणा। तर्कश्चैव समाधिश्च षडंगो योग उच्यते। यथा पर्वतधातूनां दह्यंते धमना मलाः
तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात्॥ प्रणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम्॥ किल्बिषं हि क्षयं नी
त्वा रुचिरं चैव चिंतयेत्॥ रुचिरे रेचकं चैव वायोराकर्षणं तथा। प्राणायामास्त्रयः प्रोक्ता रेचकपूरककुंभकाः
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥ त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते॥ उत्क्षिप्य वायुमाकाशं शू
न्यं कृत्वा निरात्मकम्॥ शून्यभावेन युंजीयाद्रेचकस्येति लक्षणम्॥ नोच्छ्वसेन्नानुच्छ्वसेन्नैव गात्राणि चालयेत्॥ ए
वं वायुर्गृहीतव्यः पूरकस्येति लक्षणम्॥ वक्त्रेणोत्पलनालेन वायुं कृत्वा निराश्रयं॥ एवं वायुर्गृहीतव्यः कुंभकस्ये
ति लक्षणम्॥ अंधवत्पश्य रूपाणि शद्वं बधिरवच्छृणु॥ काष्ठवत्पश्यते देहं प्रशांतस्येति लक्षणम्॥ मनः संकल्पकं
ध्यात्वा संक्षिप्यात्मनि बुद्धिमान्। धारयित्वा तथात्मानं धारणा परिकीर्तिता॥ आगमस्याविरोधेनोहनं तर्क उच्यते॥
यं लब्ध्वाप्यवमन्येत स समाधिः प्रकीर्तितः। भूमौ दर्भासने रम्ये सर्वदोषविवर्जिते॥ कृत्वा मनोमयीं रक्षां जप्त्वा चैवा

कृ.ह्म॰
४

यमंडलं॥ पद्मकं स्वस्तिकं वापि भद्रासनमथापि वा॥ बध्वा योगासनं सम्यगुत्तराभिमुखः स्थितः॥ नासिका
पुटमंगुल्यापिधायैकेन मारुतं आकृष्य धारयेदग्निं शब्दमेवाभिचिंतयेत्॥ ॐ मित्येकाक्षरं ब्रह्मो मित्येकेन रे
चयेत्॥ दिव्यमंत्रेण बहुधा कुर्यादात्ममलच्युतिम्॥ पश्चाद्ध्यायेत्पूर्वोक्तंक्रमशो मंत्रनिर्दिनोत्त्॥ स्थूला
तिस्थूलमात्रायां नातिमूर्ध्वमतिक्रमः॥ तिर्यगूर्ध्वमधो दृष्टिं विनिधाय महामतिः। स्थिरस्थायी विनिष्कंपस्त
दा योगं समभ्यसेत्॥ तालमात्रा तथा योगो धारणा योजनं तथा द्वादशमात्रो योगस्तु कालतो नियमः स्मृत
॥ अघोषमव्यंजनमस्वरं च अकंठतालोष्ठमनासिकं च यत्॥ अरेफजातमुभयोष्ठवर्जितं यत्तदक्षरं न क्षर
ति कदाचित्॥ येनासौ पश्यते मार्गं प्राणस्तेन हि गच्छति अतः समभ्यसेन्नित्यं सन्मार्गगमनाय वैः हृद्द्वारं वा
युद्वारं च दुर्ध्वद्वारमतः परम्॥ मोक्षद्वारबिलं चैव सुषिरं मंडलं विदुः भयं क्रोधमथालस्यमतिस्वप्नातिजागर
म्॥ अत्याहारमनाहारं नित्यं योगी विवर्जयेत्॥ अनेन विधिना सम्यद्धि· त्स माभ्यस्यतः क्रमात् स्वयमुत्पद्यते

ई सोप०
५
5

ज्ञानंत्रिभिर्मासैर्नेसंज्ञापः॥ चतुर्थिःपश्यतेदेवान्यवभिस्कस्त्वविक्रमः इच्छयाप्नोतिकैवल्यंषष्ठेमासिन
संज्ञयःपार्थिवः पंचमात्रः स्याच्चतुर्मात्रस्तुवारुणः आग्नेयस्तुत्रिमात्रोहिवायव्यस्तुद्विमात्रकः एकमात्रस्तथा
काशोह्यर्धमात्रंतुचिंतयेत्॥ सिध्यैःकृत्वातुमनसाचिंतयेदात्मनात्मनि॥ त्रिंशत्पर्वांगुलः प्राणोयत्रप्राणःप्रति
ष्ठितः एषप्राणइतिख्यातोबाह्यप्राणस्यगोचरः अशीतिःषट्शतंचैवसहस्राणित्रयोदश॥ लक्षश्चैकोनिनिःश्वा
सोहोरात्रप्रमाणतः॥ प्राणआद्योहृदिस्थानेऽपानस्तुपुनर्गुदे॥ समानोनाभिदेशेतूदानःकंठमाश्रितः॥ व्यानःस
र्वेषुचांगेषुसदाव्याप्यतिष्ठति अथवर्णास्तुपंचानांप्राणादीनामनुक्रमात्॥ रक्तवर्णमणिप्रख्यःप्राणोवायुः
प्रकीर्तितः अपानस्तस्यमध्येतुइंद्रगोपसमप्रभः॥ समानस्तस्यमध्येचगोक्षीरस्फटिकप्रभः बिंओउरउ
दानश्चव्यानोह्यर्चिसमप्रभः यस्यैषमंडलंभित्वामारुतोयातिमूर्द्धनि॥ यत्रयत्रम्रियेतापिनसभूयोभिजायतेन
सभूयोभिजायतइति॥ ॐ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभि

कृष्ण
५

भद्रोमदेवाहितंयदायुः स्वस्तिनइंद्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिस्वस्ति
नोबृहस्पतिर्दधातु॥ ॐ शांतिः शांतिः शांतिः श्रीगुरुभ्योनमः श्रीगणेशायनमः अथातोमहोपनिषदमेव॥ त
दाहुरेकोहवैनारायण आसीत्। नब्रह्मानईशानोनाग्नीषोमौनेमेद्यावापृथिवीननक्षत्राणिनसूर्यःसएका
कीनरएवतस्यध्यानांतस्थस्ययत्रसंस्तोममुच्यतेतस्मिन्पुरुषाश्चतुर्दशजायंतएकाकन्यादशेंद्रियाणिमन
एकादशंतेजोद्वादशंअहंकारस्त्रयोदशः प्राणाश्चतुर्दशआत्मापंचदशीबुद्धिपंचतन्मात्राणिपंचमहाभूतानिसए
षपंचविंशकःपुरुषस्तंपुरुषंपुरुषोनिवेश्यनास्यप्रजानसंवत्सराजायंतेसंवत्सरादधिजायंतइत्यथपुनरेवना
रायणःसोन्यत्कामोमनसाध्यायेनतस्यध्यानांतस्थस्यललाटात्र्यक्षःशूलपाणिःपुरुषोजायतेबिभ्रच्छ्रियंसत्यं
ब्रह्मचर्यंतपोवैराग्यंमनऐश्वर्यंसप्रणवाव्याहृतयऋग्यजुःसामाथर्वांगिरसः सर्वाणिछंदांसितान्यंगेषाश्रि
तानि॥ अथपुनरेवनारायणःसोन्यत्कामोमनसाध्यायेततस्यध्यानांतस्थस्यललाटात्स्वेदोःपतत्तताइमाः

महोपनि
६

6

प्रततताआपस्तास्मुत्तेजोहिरण्मयमंडंतत्रब्रह्माचतुर्मुखोजायतसोध्यायत॥पूर्वोभिमुखोभूरितिव्याहृतिर्गाय
त्रंछंदऋग्वेदःपश्चिमाभिमुखोभूत्वाभुवइतिव्याहृतिस्त्रैष्टुभंछंदोयजुर्वेदःउत्तराभिमुखोभूत्वास्वरितिव्याहृति
र्जागतंछंदःसामवेदःदक्षिणाभिमुखोभूत्वांजनदितिव्याहृत्यानुष्टुभंछंदोऽथर्ववेदः सहस्रशीर्षंदेवंसहस्राक्षं
विश्वशंभुवंविश्वतःपरमंनित्यंविश्वंनारायणंहरिंविश्वमेवेदंपुरुषंतंविश्वमुपजीवतिशाश्वतंविश्वेश्वरंसमुद्रेतं
विश्वरूपिणंपद्मकोशप्रतीकाशंलंबत्याकोशसंनिभंहृदयेचाप्यधोमुखंसंततेशीकराभिश्चतस्यमध्येमहा
नर्चिर्विश्वार्चिर्विश्वतोमुखंतस्यमध्येवह्निशिखाअणीयोर्ध्वाव्यवस्थितातस्याःशिखायामध्येपुरुषःपरमात्माव्यव
स्थितःसब्रह्मासईशानःसोक्षरःपरमःस्वराट्॥यइदंमहोपनिषदंब्राह्मणोधीतेश्रोत्रीयःश्रोत्रियोभवत्य
नुपनीतउपनीतोभवतिसोग्निपूतोभवतिसवायुपूतोभवतिससोमपूतोभवतिससोमपूतोभवतिससर्वपू
तोभवतिससर्वपूतोभवतिसस[illegible]र्वैर्देवैर्ज्ञातोभवतिससर्वैर्वेदैरनुध्यातोभवतिससर्वेषुतीर्थेषुस्नातोभवतिन

हरिः
६

नसर्वैः क्रतुभिरिष्टं भवति गायत्र्याः षष्टिसहस्राणि जप्तानि भवंतीतिहासपुराणानां रुद्राणां शतसहस्राणि जप्ता
नि भवंति प्रणवानामयुतं जप्तं भवत्याचक्षुषः पंक्तिं पुनात्यासप्तमात्पुरुषयुगात्पुनातीत्याह भगवान्हिरण्यगर्भो
जाप्येनामृतत्वं गच्छत्यमृतत्वं गच्छतीति॥ इति महोपनिषत्समाप्ता॥ श्री अथ योगिनां परमहंसानां कोयं
मार्गस्तेषां का स्थितिरिति नारदो भगवंतमुपसमेत्योवाच तं भगवानाह॥ योयं परमहंसमार्गो लोके दुर्लभतरो
न तु बाहुल्यं यद्येकोपि भवति स एव नित्यपूतस्थः स एव वेदपुरुष इति विदुषो मन्यंते॥ महापुरुषो यच्चित्तं तत्स
दा मय्येवावतिष्ठते॥ तस्मादहं च तस्मिन्नेवावस्थितः असौ स्वपुत्रमित्रकलत्रबंध्वादीन् शिखायज्ञोपवीते स्वा
ध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं च हित्वा कौपीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय च लोकस्योपका
रार्थाय च परिग्रहेत्॥ तच्च न मुख्योस्ति कोयं मुख्य इति चेदयं मुख्यो न दंडं न शिखं न यज्ञोपवीतं नाच्छादनं चर
ति परमहंसः न शीतं न चोष्णं न दुःखं न सुखं न मानावमाने च षडूर्मिवर्ज्यं॥ निंदागर्वमत्सरदंभदर्पेच्छाद्वेषसुख

परम०
१

खदुःखकामक्रोधलोभमोहहर्षासूयाहंकारादींश्च हित्वा स्ववपुः कुणपमिव दृश्यते यतस्तद्वपुरपध्वस्तं संशय
विपरीतमिथ्याज्ञानानां यो हेतुस्तेन नित्यनिवृत्तस्तन्नित्यबोधस्तत्स्वयमेवावस्थितिस्तं शान्तमचलमद्वयानंदवि
ज्ञानघन एवास्मि तदेव मम परमं धाम तदेव शिखा च तदेव यज्ञोपवीतं च परमात्मात्मनोरेकत्वज्ञानेन तयोर्भेद एव
विभग्नः सा संध्या सर्वान्कामान्परित्यज्याद्वैते परमा स्थितिः ज्ञानदंडो धृतो येन एकदंडी स उच्यते काष्ठदंडो धृतो येन
सर्वाशी ज्ञानवर्जितः तितिक्षाज्ञानवैराग्यशमादिगुणवर्जितः भिक्षामात्रेण यो जीवेत्स पापी यतिवृत्तिहा ॥ स
याति नरकान्घोरान्महारौरवसंज्ञकान् ॥ इदमंतरं ज्ञात्वा स परमहंसः आशांबरो न नमस्कारो न स्वधाकारो न नि
न्दा न स्तुतिर्यादृच्छिको भवेद्भिक्षुर्नावाहनं न मंत्रं न ध्यानं नोपासनं च लक्ष्यं नालक्ष्यं न पृथक् नापृथगहं न त्वं न
सर्वं चानिकेतस्थितिरेव स भिक्षुः सौवर्णादीन्नैव परिग्रहेन्न लोकं नावलोकं च । अबाधकः क इति चेत् । अबाध
कोस्त्येव । यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत्स ब्रह्महा भवेत् ॥ य० न स्पृष्टं चेत्स पौल्कसो भवेत् ॥ य० न ग्राह्यं चेत्स आ

राम
१

त्मद्दाभवेत् तस्माद्भिक्षुर्हिरण्यंरसेननदृष्टंचनस्पृष्टंचनग्राह्यंचसर्वेकामामनोगताव्यावर्त्तन्तेदुःखेनोद्वि
ग्नःसुखेनिस्पृहस्त्यागोरागे॰सर्वत्रशुभाशुभयोरनभिस्नेहोनद्वेष्टिनमोदंचसर्वेषामिंद्रियाणांगतिरुपर
मतेयआत्मन्येवावस्थीयतेयत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीतिकृतकृत्योभवतिकृतकृत्योभवति इ
तिपरमहंसोपनिषत्॥ श्रीः बृहस्पतिरुवाचयाज्ञवल्क्यंयदनुकुरुक्षेत्रंदेवानांदेवयजनंसवभद्रंक॰शां
तिषांभूतानांब्रह्मसदनमविमुक्तंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनंतस्माद्यत्रस्माद्य
त्रक्वचनगच्छतितदेवमन्येतेतीदंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनंअत्रहिजंतोःप्राणे
षूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टे।येनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेताविमु
क्तंनविमुंचेदेवमेवैतद्याज्ञवल्क्यः॥१॥अथहैनमत्रिःपप्रच्छयाज्ञवल्क्यंयएषोऽनंतोऽव्यक्तआत्मातंकथम
हंविजानीयामितिसहोवाचयाज्ञवल्क्यःसोऽविमुक्तउपास्योयएषोऽनंतोऽव्यक्तआत्मासोऽविमुक्तेप्रतिष्ठितइति

जावाल० ८ ४

सोविमुक्तःकस्मिन्प्रतिष्ठितइतिवरणायांनाश्यांचमध्येप्रतिष्ठितइतिकावैवरणाकाचनाशीतिसर्वानिंद्रि
यकृतान्दोषान्वारयतीतितेनवरणाभवतिसर्वानिंद्रियकृतान्पापान्नाशयतीतितेननासीभवतीतिकतम
च्चास्यस्थानंभवतीतिभ्रुवोर्घ्राणस्यचयःसंधिःसएषद्यौर्लोकस्यचपरस्यचसंधिर्भवतीत्येतद्वैसंधिंसंध्यां
ब्रह्मविदउपासतइतिसोविमुक्तउपास्यइतिसोविमुक्तंज्ञानमाचष्टेयोवैतदेतदेवंवेदाथहैनंब्रह्मचारिणऊचु
:किंजप्येनामृतत्वंनोब्रूहीतिसहोवाचयाज्ञवल्क्यःशतरुद्रियेणेत्येतान्येवहवाअमृतनामधेयान्येतैर्हवा
अमृतोभवतीति २ अथहजनकोहवैदेहोयाज्ञवल्क्यमुपसमेत्योवाचभगवन्संन्यासमनुब्रूहिसहोवाच
याज्ञवल्क्यःब्रह्मचर्यंसमाप्यगृहीभवेद्गृहाद्वनीभूत्वाप्रव्रजेत्यदिवेतरथाब्रह्मचर्यादेवप्रव्रजेद्गृहाद्वनाद्वा
थपुनरव्रतीवाव्रतीवास्नातकोवास्नातकोवोत्सन्नाग्निकोवानग्निकोवायदहरेवविरजेत्तदहरेवप्रव्रजेत्तद्धैके
प्राजापत्यामेवेष्टिंकुर्वंतितदुतथानकुर्यादाग्नेयीमेवेष्टिंकुर्यादग्निर्हिप्राणःप्राणमेवैतयाकरोतित्रैधातवी

राम ८

याामेवकुर्यादेतयैवत्रयोधातवोपदुत यदुतसत्वंरजस्तमइत्ययंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः
तंजानन्नग्नआरोहाथानोवर्द्धयारयिमित्यनेनमंत्रेणाग्निमाजिघ्रेदेषवाअग्नेर्योनिर्यःप्राणःप्राणंगच्छ
स्वाहेत्येवमेवैतदाहग्रामादग्निमाहृत्यपूर्ववदग्निमाघ्रापयेत्यद्यग्निंनविंदेदप्सुजुहुयादापोवैसर्वादेव
ताःसर्वाभ्योदेवताभ्योजुहोमिस्वाहेतिहुत्वोद्धृत्यप्राश्नीयात्साज्यंहविरनामयंमोक्षमंत्रस्त्रय्येवंविदेत्त
द्ब्रह्मैतदुपासितव्यमेवमेवैतद्भगवन्नितिवैयाज्ञवल्क्यः॥३ अथहैनमत्रिःपप्रच्छयाज्ञवल्क्यंपृच्छामित्वा
याज्ञवल्क्याऽयज्ञोपवीतीकथंब्राह्मणइतिसहोवाचयाज्ञवल्क्यइदमेवास्यतद्यज्ञोपवीतंयआत्माप्राश्या
चम्यायंविधिःपरिव्राजिनांवीराध्वानेवानाशकेवापांप्रवेशेवाग्निप्रवेशेवामहाप्रस्थानेवाथपरिव्राड्विवर्ण
वासामुंडोपरिग्रहःशुचिरद्रोहीभैक्षाणोब्रह्मभूयायभवतीयद्यातुरःस्यान्मनसावाचावासंन्यसेत्एषपंथा
ब्रह्मणाहानुवित्तःसंन्यासीब्रह्मविदित्येवमेवैतद्भगवन्नितिवैयाज्ञवल्क्यः ४ तत्रपरमहंसानाम

जाबा॰रु॰
९
9

संवर्त्तकारुणिश्वेतकेतुदुर्वाससऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयोव्यक्तलिंगा अव्यक्ताचारा अ
नुन्मत्ताउन्मत्तवदाचरंतस्त्रिदंडंकमंडलुंशिक्यंपात्रंजलपवित्रंशिखांयज्ञोपवीतंचेत्येतत्सर्वं भूः स्वाहेत्यप्सु
परित्यज्यात्मानमन्विच्छेत् यथाजातरूपधरोनिर्द्वंद्वोनिष्परिग्रहस्तत्वब्रह्ममार्गेसम्यक्संपन्नः शुद्धमानसः
प्राणसंधारणार्थं यथोक्तकालेविमुक्तोभैक्षमाचरन्नुदरपात्रेणलाभालाभौसमौभूत्वाशून्यागारदेवगृहतृणा
कूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थंडिलेष्वनिकेतवा
स्यप्रयत्नोनिर्ममः शुक्लध्यानपरायणोध्यात्मनिष्ठोऽशुभकर्मनिर्मूलनपरोयसंन्यासेनदेहत्यागंकरोतिसप
रमहंसोनामेति भद्रंकर्णे॰ इतिजाबालोपनिषत्समाप्ता ॐ आरुणिः प्रजापतेर्लोकंजगामतंगत्वोवाच
केनभगवन्कर्माण्यशेषतोविसृजामीतितंहोवाचप्रजापतिस्तवपुत्रान्भ्रातॄन्बंध्वादीञ्छिखांयज्ञोपवीतंया
गंसूत्रंस्वाध्यायंचभूर्लोकभुवर्लोकसुवर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकंचातलवितलसुतल

रुण॰
९

लसातलंतलातलंमहातलंपातालंब्रह्मांडंचविसृजेदंडमाच्छादनंकौपीनंपरिग्रहेच्छेषंविसृजेच्छेषंवि
सृजेत्गृहस्थोब्रह्मचारीवानप्रस्थोवालौकाग्नीनुदराग्नौसमारोपयेद्गायत्रींचस्ववाचाग्नौसमारोपयेदुप
वीतंभूमौवाप्सुवाविसृजेत्कुटीचकोब्रह्मचारीकुटुंबंविसृजेत्पात्रंविसृजेत्पवित्रंविसृजेद्दंडान्लोकाग्नीन्वि
सृजेदितिहोवाचातऊर्ध्वममंत्रवदाचरेदूर्ध्वगमनंविसृजेत्त्रिसंध्यादौस्नानमाचरेत्संधिंसमाधावात्म
न्याचरेत्सर्वेषुवेदेष्वारण्यमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तयेत्खल्वहंब्रह्मसूत्रंसूचनात्सूत्रंब्र
ह्मसूत्रमहमेवविद्वान् त्रिवृत्सूत्रंत्यजेद्विद्वान्यएवंवेद संन्यस्तंमयासंन्यस्तंमयासंन्यस्तंमयेतित्रिष्कृत्वोभयंस
र्वभूतेभ्योमत्तःसर्वंप्रवर्ततेसखामागोपायौजःसखायोसीन्द्रस्यवज्रोसिवार्त्रघ्नःशर्ममेभवयत्पापंतन्नि
वारयेत्यनेनमंत्रेणकृत्वोर्ध्वंवैणवंदंडंकौपीनंपरिग्रहेदौषधवदशनमाचरेदौषधवदशनमाचरेद्ब्रह्मचर्यम
हिंसांचापरिग्रहंचसत्यंचयत्नेनहेरक्षतोंहेरक्षतेति अथातःपरमहंसपरिव्राजकानामासनशयनाभ्यां

आरुणि
१०
10

भूमौब्रह्मचारिणांमृत्पात्रमलाबुपात्रंदारुपात्रंवाकामक्रोधलोभमोहदंभदर्पासूयाममत्वाहंकारानृतादीनपि
त्यजेद्वर्षासुध्रुवशीलोऽष्टौमासःएककीयतिश्चरेद्द्वावेववाचरेद्द्वावेववाचरेत् खलुवेदार्थंयोविद्वान्सोपनयनादू
र्ध्वंसतानिप्राग्वात्यजेत्पितरंपुत्रमग्न्युपवीतंकर्मकलत्रंचान्यदपीहयतयोहिभिक्षार्थंग्रामंप्रविशंतिपाणि
पात्रमुदरपात्रंवा ॐ हि ॐ ह्येतदुपनिषदंविन्यसेद्विद्वान्यएवंवेद। पालाशंमौदुंबरंदंडमजिनमेखलांशिखांय
ज्ञोपवीतंचत्यक्त्वाशूरोयएवंवेद तद्विष्णोःपरमंपदंसदापश्यंतिसूरयःदिवीवचक्षुराततंतद्विप्रासोविपन्यवो
जागृवांसःसमिंधतेविष्णोर्यत्परमंपदमित्येवंनिर्वाणानुशासनंवेदानुशासनंवेदानुशासनमिति इत्यारु
ण्युपनिषत्समाप्ता भद्रं० शांति॥ ॐ शौनकोवैमहाशालोंगिरसंभगवंतंपिप्पलादमपृच्छद्दिव्येब्रह्मपुरेसंप्र
तिष्ठिताभवंति। कथंसृजंतिकस्यैषमहिमाबभूवयोह्येषमहिमाबभूवकएषतस्मैसहोवाचब्रह्मविद्यांवरिष्ठां
प्राप्योत्येषआत्माआत्मनोमहिमान्भवदेवानांआयुःसदेवानांनिधनमनिधनंदिव्येब्रह्मपुरेविरजंनिष्कलंशु

एम
१०

ष्करंयद्ब्रह्मविभातिसनियच्छतिमधुकंरराजानंमाक्षिकवद्यथामाक्षीकैकेनतंतुनाजालंविक्षिपतितेनापकर्ष
तितथैवैषप्राणोयदायातिसंसृष्टमाकृष्यंप्राणदेवतास्ताःसर्वानाड्यःसुषुप्तेश्येनाकाशवद्यथाखंश्येनमा
श्रित्ययातिस्वमालयंसुषुप्तावृत्तिपथैवैषदेवदत्तोयष्ट्यापिताड्यमानोनयत्येवमिष्टापूर्तैःशुभाशुभैर्नलिप्य
तेयथाकुमारोनिष्कामआनंदमुपयातितथैवैषदेवदत्तःस्वप्नआनंदमभियातिवेदएवपरंज्योतिष्कामोज्योतिज्यो
तिरानंदयतेभूयस्तेनैवस्वप्नायगच्छतिजलौकावद्यथाजलौकाग्रमग्रंनयत्यात्मानंनयतिपरंसंधयत्यपरंना
परंत्यजतियत्सजाग्रदभिधीयतेयथैवैषकपालाष्टकंसंनयतितमेवस्तनइवलंवतएषवेददेवयोनिर्यत्रजाग्रतिशु
भाशुभंनिरुक्तमस्यदेवस्यससंप्रसारोंतर्यामीखगःकर्कटकःपुष्करःपुरुषःप्राणोहिंसापरापरंब्रह्मात्मादेवतावे
दयतियएवंवेदसपरंब्रह्मधामक्षेत्रज्ञमुपैति १ अथास्यपुरुषस्यचत्वारिस्थानानिभवंतिनाभिर्हृदयंकंठंमू
मूर्द्धाचतत्रचतुष्पादंब्रह्मविभातिजागरितेब्रह्मास्वप्नेविष्णुःसुषुप्तेरुद्रस्तुरीयमक्षरंसआदित्योविष्णुश्चेश्वराकर

श्चरवयममनस्कमश्रोत्रमपाणिपादंज्योतिर्विदितंयत्रलोकानलोकादेवानदेवानयज्ञावेदानवेदायज्ञामातान
मातापितानपितास्नुषानस्नुषाचांडालोनचांडालःपौल्कसोनपौल्कसःश्रमणोनश्रमणस्तापसोनतापस ए
कमेवतत्परंब्रह्मविभातिनिर्वाणंनतत्रदेवाऋषयःपितरईशतेप्रबुद्धःसर्वविद्येति हृदिस्थादेवताःसर्वाहृदि
प्राणाःप्रतिष्ठिताःहृदिप्राणश्चज्योतिश्चतिष्ठत्सूत्रंचतद्विदुः हृदिचैतन्येतिष्ठतियज्ञोपवीतंपरमंपवित्रंप्रजापतेर्य
त्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजःसशिखंवपनंकृत्वाबहिःसूत्रंत्यजेद्बुधः
यदक्षरंपरंब्रह्मतत्सूत्रमितिधारयेत् सूचनात्सूत्रमित्याहुःसूत्रंनामपरंपदं तत्सूत्रंविदितंयेनसविप्रोवेदपा
रगः येनसर्वमिदंप्रोतंसूत्रेमणिगणाइव तत्सूत्रंधारयेद्योगीयोगवित्तत्वदर्शिवान्॥ बहिःसूत्रंत्यजेद्विद्वान्योग
मुत्तममास्थितः ब्रह्मभावमिदंसूत्रंधारयेद्यःसचेतनःधारणात्तस्यसूत्रस्यनोच्छिष्टोनाशुचिर्भवेत्॥ सूत्रमंत
र्गतंयेषांज्ञानयज्ञोपवीतिनाम्॥ तेवैसूत्रविदोलोकेतेचयज्ञोपवीतिनःज्ञानशिखिनोज्ञाननिष्ठाज्ञानयज्ञोप

वीतिनः ज्ञानमेवपरंतेषांपवित्रंज्ञानमुच्यते अग्नेरिवशिखानान्यायस्यज्ञानमयीशिखा सशिखीत्युच्यतेवि
द्वान्नेतरेकेशधारिणः कर्मण्यधिकृतायेतुवैदिकेब्राह्मणादयः तेभिर्धार्यमिदंसूत्रंक्रियांगंतद्धिवैस्मृतम्
शिखाज्ञानमयीयस्यउपवीतंचतन्मयम् ब्राह्मण्यंसकलंतस्यइतिब्रह्मविदोविदुः इदंयज्ञोपवीतंतुपरमंय
त्परायणं सविद्वान्यज्ञोपवीतीस्यात्सयज्ञस्तंयज्विनंविदुः एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरा
त्मा धर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्च एकोवशीसर्वभूतांतरात्मैकंरूपंबहुधायःक
रोति आत्मानमरणिंकृत्वाप्रणवंचोत्तरारणिंध्याननिर्मथनाभ्यासाद्देवंपश्येन्निगूढवत्॥ तिलेषुतैलंदधनी
वसर्पिरापःस्रोतःस्वरणीषुचाग्निः एवमात्मात्मनिजायतेसौसत्येनैनंतपसायोनुपश्यति ऊर्णनाभिर्यथातं
तून्सृजतेसंहरत्यपि जाग्रत्स्वप्नेतथाजीवोगच्छत्यागच्छतेपुनः नेत्रस्थंजागरितंविद्यात्कंठेस्वप्नंसमाविशेत्॥
सुषुप्तंहृदयस्थंतुतुरीयंमूर्द्धनिसंस्थितं यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह॥ आनंदमेतज्जीवस्ययज्ज्ञात्वा

स्वाधि १

मुच्यते बुधः सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्पदं तद्ब्रह्मोपनिषत्पदमिति
॥ इति ब्रह्मोपनिषत्समाप्ता भद्रं॰ शांतिः ॐ पंचात्मकं पंचसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तं तत्स
प्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरं पंचात्मकं कस्मात्पृथिव्यापस्तेजोवायुराकाशमित्यस्मिन्पंचात्म
के शरीरे का पृथिवी का आपः किं तेजः को वायुः किमाकाशमिति तत्र यत्काठिण्यं सा पृथिवी यद्द्रवं ता आपो यदुष्णं त
त्तेजो यत्संचरति स वायुः॰ यत्सुषिरं तदाकाशं तत्र पृथिवी धारणे आपः पिंडीकरणे तेजः प्रकाशने वायुर्व्यूहने आका
शमवकाशप्रदाने पृथक्श्रोत्रे शब्दोपलब्धौ त्वक्स्पर्शे चक्षुषी रूपे जिह्वा रसने नासिका घ्राणं उपस्थ आनंदे पानमु
त्सर्गे बुद्ध्या बुध्यति मनसा संकल्पयति वाचा वदति षडाश्रयं कस्मान्मधुराम्ललवणतिक्तकटुकषायरसान्विंदते षड्
ड्जऋषभगांधारमध्यमपंचमधैवतनिषादाश्चेति इष्टानिष्टाशब्दसंज्ञाः प्रणिधानाद्दशविधा भवंति सप्तधातु
कं कस्मात् शुक्लो रक्तः कृष्णो धूम्रः पीतः कपिलः पांडुर इति यथा देवदत्तस्य द्रव्याणि विषया जायंते परस्परं सौम्य

गुणत्वात्षड्विधोरसोरसाच्छोणितंशोणितान्मांसंमांसान्मेदोमेदसोस्थीन्यस्थिभ्योमज्जामज्जायाः शुक्रं
शुक्रशोणितसंयोगादावर्ततेगर्भोहृदिव्यवस्थानीतिहृदयेंतराग्निरग्निस्थानेपित्तंपित्तस्थानेवायुर्वायुतोहृद
यंप्राजापत्यात्क्रमादृतुकालेसंप्रयोगादेकरात्रोषितंकलिलंभवतिसप्तरात्रोषितंबुद्बुदंभवत्यर्धमासाभ्यं
तरेणपिंडोभवतिमासाभ्यंतरेणकठिणाउभवतिमासद्वयेनशिरोभवतिमासत्रयेणपादप्रदेशोभवत्यथच
तुर्थेमासेगुल्फजठरकटिप्रदेशोभवतिपंचमेमासेपृष्ठवंशोभवतिषष्ठेमासेनासिकाक्षिश्रोत्राणिभवंतिस
प्तमेमासेजीवेनसंयुक्तोभवत्यष्टमेमासेसर्वसंपूर्णोभवतिपितूरेतोतिरिक्तात्पुरुषोभवतिमातूरेतोतिरिक्तात्स्त्री
योभवत्युभयोर्बीजतुल्यत्वान्नपुंसकोभवतिव्याकुलितमनसोंधाःखंजाःकुब्जवामनाभवंतिअन्योन्यवायुप
रिपीडितशुक्रद्वैविध्याद्द्विधातनुःस्याद्युग्माःप्रजाजायंतेपंचात्मकंसमर्थःपंचात्मिकाचेतसाबुद्धिर्गंधरसादिज्ञा
नाक्षराक्षरंमोक्षंचिंतयतीतितदेतदेकाक्षरंज्ञात्वाष्टौप्रकृतयःषोडशविकाराःअथमात्राशितपीतनाडीसूत्रग

तेनप्राणआप्यायतेथनवमेमासिसर्वलक्षणज्ञानसंपूर्णोभवतिपूर्वजातीःस्मरतिशुभाशुभंचकर्मविंदति॥
नानायोनिसहस्राणिदृष्ट्वाचैवततोमया आहाराविविधाभुक्ताःपीताश्चविविधास्तनाः॥ जातश्चाहंमृतश्चैव
जन्मजन्मपुनःपुनः अहोदुःखोदधौमग्नोनपश्यामिप्रतिक्रियाम् यन्मयापरिजनस्यार्थेकृतंकर्मशुभाशुभं
एकाकीतेनदह्येहंगतास्तेफलभागिनः यदियोन्याःप्रमुच्येहंतंप्रपद्येमहेश्वरम् अशुभक्षयकर्तारंपरमुक्तिप्र
दायिनम् यदियोन्याःप्रमुच्येहंतंप्रपद्येभगवंतंनारायणंवासुदेवम् अशुभक्षयकर्तारंपरमुक्तिप्रदायिनम्
यदियोन्याःप्रमुच्येहंतंसांख्यंयोगमभ्यसेत् अशुभक्षयकारकंपरमुक्तिप्रदायकं अथयोनिद्वारंसंप्राप्तोयंत्रेण
पीड्यमानोमहतादुःखेनजातमात्रस्तुवैष्णवेनवायुनासंस्पृष्टस्तदानस्मरतिजन्ममरणानिनचकर्मशुभाशु
भंविंदति शरीरमितिकस्मात् अग्नयोह्यत्रश्रियंतेज्ञानाग्निर्दर्शनाग्निःकोष्ठाग्निरितितत्रकोष्ठाग्निर्नामाशितपी
तलेह्यचोष्यंपचतीति दर्शनाग्नीरूपाणांदर्शनंकरोति~~[श्चतुष्कपालंश्चिर]~~ज्ञानाग्निःशुभाशुभंकर्मविंदतित्रीणि॥

स्थानानि भवंति मुख आहवनीय उदरे गार्हपत्यो हृदि दक्षिणाग्निरात्मा यजमानो ब्रह्मा लोभादयः पशवो धृतिर्दीक्षा
संतोषश्च बुद्धींद्रियाणि कर्मेंद्रियाणि यज्ञपात्राणि हवींषि शिरः कपालं केशा दर्भा मुखमंतर्वेदि षोडश पार्श्वदंतो
श्चतुष्कमालं शिरः पटलानि सप्तोत्तरं मर्मशतं साशीतिकं संधिशतं सनवकं स्नायुशतं सप्तशिराशतानि पंच मज्जा
शतान्यस्थीनि च ह वै त्रीणि शतानि षष्टिश्चार्द्धचतस्रो रोमकोट्यो हृदयं पलान्यष्टौ द्वादशपला जिह्वा पित्तप्रस्थं कफ.
स्याढकं शुक्रं कुडवं मेदः प्रस्थौ द्वावनियतं मूत्रपुरीषमाहारपरिमाणात् पैप्पलादं मोक्षशास्त्रं पैप्पलादं मोक्षशास्त्रं ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः स्व
स्ति न इंद्रो वृद्धश्रवाः स्वमिनः पू० शांति गर्भोपनिषत्समाप्ताः भद्रं० भिः ॐ शांति ३ ॐ तदाहुः किं तदा
तस्मै स होवाच न सन्नासन्न सदसदिति तस्मात्तमः संजायते तमसो भूतादि भूतादेराकाशं आकाशाद्वायुः वायोर
ग्निः अग्नेरापः अद्भ्यः पृथिवी तदंडं समभवत् तत्संवत्सरमात्रमुषित्वा द्विधा करोत् अधस्ताद्भूमिमुपरिष्टादाकाशम

सूबालो०
१४
14

मध्येपुरुषोदिव्यःसहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपान्सहस्रबाहुरितिसोग्रेभूतानांमृत्युमसृजत्र्यक्षंत्रि
शिरस्कंत्रिपादंखंडपरशुंतस्यब्रह्माबिभेतिसोब्रह्माणमेवाविवेशसमानसान्सप्तपुत्रानसृजन्तेहविराजःस
त्यमानसानसृजन्तेहप्रजापतयोब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतःऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअ
जायतचंद्रमामनसोजातश्चक्षोःसूर्योअजायतश्रोत्राद्वायुश्चप्राणश्चहृदयात्सर्वमिदंजायते १ आपानान्निषादा
यक्षराक्षसगंधार्वाश्चास्थिभ्यःपर्वतालोमभ्यओषधिवनस्पतयोललाटात्क्रोधजायततस्यैतस्यमहतोभूतस्यनि
श्वसितमेतदृग्वेदोयजुर्वेदःसामवेदोयथर्ववेदःशीक्षाकल्पोव्याकरणंनिरुक्तंछंदोविचिकिषंज्योतिषामयनंन्या
योमीमांसाधर्मशास्त्राणिव्याख्यानान्युपव्याख्यानानिसर्वाणिचभूतानिहिरण्यज्योतिर्यस्मिन्नयमात्माधिक्षीयं
तेभुवनानिविश्वा आत्मानंद्विधाकरोदर्धेनस्त्रीअर्धेनपुरुषोदेवोभूत्वादेवानसृजन्नृषिर्भूत्वाऋषीन्यक्षरा
क्षसगंधर्वान्ग्राम्यारण्यांश्चपशूनसृजदितरागाइतरानडुहानितराबडवेनरोश्वइतरागर्दभीतरोगर्दभइतरा

राम
१४

रा विश्वंभरीतरो विश्वंभरः सोंते वैश्वानरो भूत्वा सदग्ध्वा सर्वाणि भूतानि पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयंते तेजो
वायौ प्रलीयते वायुराकाशे विलीयते आकाशमिंद्रियेष्विंद्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयंते भूतादिर्म
हति विलीयते महानव्यक्ते विलीयते अव्यक्तमक्षरे विलीयते अक्षरं तमसि विलीयते तेन मएकीभवति परस्मिन्परस्तान्न
सन्नसदसदित्येतं निर्वाणमनुशासनमिति वेदानुशासनमिति वेदानुशासनम् २ असद्वाइदमग्र आसीत्‌ अजात
मभूतमप्रतिष्ठितमशब्दमस्पर्शमरूपमरसमगंधमव्ययमहांतं बृहंतमजमात्मानं मत्वा धीरो न शोचति अप्राणममु
खमश्रोत्रमवागमनो तेजस्कमचक्षुष्कमनाम गोत्रमशिरस्कमपाणिपादमस्निग्धमलोहितमप्रमेयमह्रस्वमदी
र्घमस्थूलमनण्वनल्पमपारमनिर्देश्यमनपावृतमप्रकाश्यमसंवृतमनंतरमबाह्यं न तदश्नाति किंचनैनं तदश्नाति किंचनैतद्वै सत्येन
दानेन तपसा नाशकेन ब्रह्मचर्येण निर्वेदेनानाशकेन षडंगेनैव साधयेदेतत्त्रयं वीक्षेत दमं दानं दयामिति न तस्य
प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद ३ हृदयस्य मध्ये लोहितं मांसपिंडं यस्मिंस्तद्दहरं पौंडरीकं कुमुदमि

सुबाल० १५ 15

वानेकधाविकसितंअनेकधाहृदयस्यदशछिद्राणिभवंतियेषुप्राणाःप्रतिष्ठिताःसयदाप्राणेनसहसंयुज्यते
तदापश्यतिनद्योनगराणिबहूनिविविधानिचयदाव्यानेनसहसंयुज्यतेतदापश्यतिदेवांश्चऋषींश्चयदापानेनस
हसंयुज्यतेतदापश्यतियक्षराक्षसगंधर्वान्यदोदानेनसहसंयुज्यतेतदापश्यतिदेवलोकान्देवान्स्कंदंजयंतंचेति
यदासमानेनसहसंयुज्यतेतदापश्यतिदेवलोकान्धनानिच यदावैरंभेणसहसंयुज्यतेतदापश्यतिदृष्टंचादृष्टंच
श्रुतंचाश्रुतंचभुक्तंचसच्चासच्चसर्वंपश्यत्यथेमादशनाड्योभवंतितासामेकैकस्यांद्वासप्ततिर्द्वासप्ततिःशाखा
नाडीसहस्राणिभवंतियस्मिन्नयमात्मास्वपितिशब्दानांचकरोत्यथद्वितीयेसंकोशेस्वपितितदेमंचलोकंपरलो
कंचपश्यतिसर्वाञ्छब्दान्विजानातिससंप्रसादइत्याचक्षतेप्राणःशरीरंपरिरक्षतिहरितस्यनीलस्यपीतस्यलोहित
स्यश्वेतस्यनाड्योरुधिरस्यपूर्णाअथात्रैतद्दहरंपुंडरीकंकुमुदमिवानेकधाविकसितंयथाकेशःसहस्रधाभिन्न
स्तथाहितानामनाड्योभवंतिहृद्याकाशेपरेकोशेदिव्योयमात्मास्वपितियत्रसुप्तोनकंचनकामंकामयतेनकंच

राम १५

नखंत्रंपश्यतिअत्रदेंअेवालोकाअलोकायज्ञाअयज्ञावानमातानपितानवंधुर्नबांधवोनस्तेनोनब्रह्महातेजस्का
रममृतंसलिलएवेदंसलिलंवनंभूयस्तेनैवमार्गेणजानात्यायधावतिसंस्थाडितिहोवाच॥४स्थानानिस्थानिभ्यो
यच्छतिनाडीतेषांनिबंधनंचक्षुरध्यात्मंद्रष्टव्यमधिभूतंआदित्यस्तत्राधिदेवतंनाडीतेषांनिबंधनंयश्चक्षुषि
योद्रष्टव्येयआदित्येयोनाड्यांयः प्राणेयोविज्ञानेयआनंदेयोहृद्याकाशेयएतस्मिन्सर्वस्मिन्नंतरेसंचरतिसो
यमात्मातमुपासीताजरमशोकमनंतं श्रोत्रमध्यात्मंश्रोतव्यमधिभूतंदिशस्तत्राधिदेवतंनाडीतेषांनिबंध
नंयःश्रोत्रेयःश्रोतव्येयोदिक्षुयोनाड्यांयः प्राणेयोविज्ञानेयआनंदेयोहृद्याकाशेयएतस्मिन्सर्वस्मिन्नंत
रेसंचरतिसोयमात्मातमुपासीताजरमम्रतमभयमशोकमनंतं। नासाध्यात्मंघ्रातव्यमधिभूतंपृथिवीतत्रा
धिदैवतंनाडीतेषांनिबंधनंयोनासायांयोघ्रातव्येयःपृथिव्यांयोनाड्यांयःप्राणेयो०नंतं जिह्वाध्यात्मंरसयि
तव्यमधिभूतंवरुणस्तत्राधिदैवतंनाडीतेषांनिबंधनंयोजिह्वायांयोरसयितव्येयोवरुणेयोनाड्यांयःप्राणेयो०

नंतं।त्वगध्यात्मंस्पर्शयितव्यमधिभूतंवायुस्तत्राधिदैवतंनाडीतेषांनिवंधनंयस्त्वचियः स्पर्शयितव्येयोवायौयो
नाड्यांयः नंतं।मनोध्यात्मंमंतव्यमधिभूतंचंद्रस्तत्राधिदैवतंनाडीतेषांनिवंधनंयोमनसियोमनसियोमंतव्येयश्चं
द्रेयानाड्यांयः प्राणेयोः नंतं।बुद्धिरध्यात्मंबोद्धव्यमधिभूतंब्रह्मातत्राधिदैवतंनाडीतेषांनिवंधनंयोबुद्धौयोबोद्ध
व्येयोब्रह्मणियोनाड्यांयः प्राणेयो॰ नंतं।अहंकारोध्यात्ममहंकर्तव्यमधिभूतंरुद्रस्तत्राधिदैवतंनाडीतेषांनिवंधनं
योहंकारेयोहंकर्तव्येयोरुद्रेयोनाड्यांयः प्राणेयो॰ नंतः चित्तमध्यात्मंचेतयितव्यमधिभूतंक्षेत्रज्ञस्तत्राधिदैवतं
नाडीतेषांनिवंधनंयश्चित्तेयश्चेतयितव्ये यः क्षेत्रज्ञेयोनाड्यांयः प्राणेयो॰ नंतं वागध्यात्मंवक्तव्यमधिभूतमग्निस्त
त्राधिदैवतंनाडीतेषांनिवंधनंयोवा वक्तव्येयोग्नौयोनाड्यांयः प्राणेयो॰ नंतं।हस्तावध्यात्ममादातव्यमधिभूतमिं
द्रस्तत्राधिदैवतंनाडीतेषांनिबंधनंयोहस्तयोर्यआदातव्येयइंद्रेयोनाड्यांयः प्राणेयो॰ नंतं।पादावध्यात्मंगंतव्यम
धिभूतंविष्णुस्तत्राधिदैवतंनाडीतेषांनिवंधनंयः पादयोर्योगंतव्येयोविष्णौयोनाड्यांयः प्राणेयो॰ नंतं।पायु

रध्यात्मंविसर्जयितव्यमधिभूतंमित्रस्तत्राधिदैवतंनाडीतेषांनिबंधनंयःपायौयोविसर्जयितव्येयोमित्रेयोना
ड्यांयःप्राणेयो॰नंतंउपस्थोध्यात्ममानंदयितव्यमधिभूतंप्रजापतिस्तत्राधिदैवतंनाडीतेषांनिबंधनंयउप
स्थेयआनंदयितव्येयःप्रजापतौयोनाड्यांयःप्राणेयोविज्ञानेयआनंदेयोहृद्याकाशेयएतस्मिन्सर्वस्मिन्नंतरेसं
चरतिसोयमात्मातमुपासीताजरममृतमभयमशोकमनंतंएषसर्वज्ञएषसर्वेश्वरएषसर्वाधिपतिरेषांतर्याम्ये
षयोनिःसर्वस्यसर्वसौख्यैरुपास्यमानोनचसर्वसौख्यान्युपास्यतिवेदशास्त्रैरुपास्यमानोनचवेदशास्त्राण्यु
पास्यतियस्यान्नमिदं९सर्वंनचयोन्नंभवत्यतःपरंसर्वनयनःप्रशास्तान्नमयोभूतात्माप्राणमयइंद्रियात्माम
नोमयःसंकल्पात्माविज्ञानमयःकालात्मानंदमयोलयात्मैकत्वंनास्तिद्वैतंकुतोमर्त्यंनास्त्यमृतंकुतोनांतःप्रज्ञो
नबहिःप्रज्ञोनोभयतःप्रज्ञोनप्रज्ञानघनोनप्रज्ञोनाप्रज्ञोपिनोविदितंवेद्यंनास्तीत्येतन्निर्वाणमनुशासनमिति
वेदानुशासनमितिवेदानुशासनम् ५ नैवेहकिंचनाग्रआसीदमूलमनाधारमिमाःप्रजाःप्रजायंतेदिव्योदे

सुबाल॰
१०
17

वएकोनारायणश्चक्षुश्चद्रष्टव्यंचनारायणः श्रोत्रंचश्रोतव्यंचनारायणोघ्राणंचघ्रातव्यंचनारायणोजिह्वाचरस
यितव्यंचनारायणस्त्वक्चस्पर्शयितव्यंचनारायणोमनश्चमंतव्यंचनारायणोबुद्धिश्चबोद्धव्यंचनारायणोहंकार
श्चाहंकर्तव्यंचनारायणश्चित्तंचचेतयितव्यंचनारायणोवाक्चवक्तव्यंचनारायणोहस्तौचादातव्यंचनारायणः पा
दौचगंतव्यंचनारायणः पायुश्चविसर्जयितव्यंचनारायणउपस्थश्चानंदयितव्यंचनारायणोधाताविधाताकर्ता
दिव्योदेवएकोनारायण॰ आदित्यारुद्रामरुतोवसवोश्विनाऋचोयजूंषिसामानिमंत्रोग्निराज्याहुतिर्नारायणउद्भवः
संभवोदिव्योदेवएकोनारायणोमातापिताभ्रातानिवासः शरणंसुहृद्गतिर्नारायणोविराजासुदर्शनाजितासौम्या
मोघाकुमारामृतासत्यामध्यमानाडीनांशिशुरसुरासूर्याभास्वतीविष्णोर्नाडीनामानिगर्जतिगायतिवायतिवर्षति
वरुणोर्यमाचंद्रमाःकलाःकलिर्धाताब्रह्माप्रजापतिर्मघवादिवसाश्चार्धदिवसाश्चकलाःकल्पाश्चमहाकल्पाश्चा
धश्चोर्ध्वंचदिशश्चसर्वंनारायणःपुरुषएवेदंसर्वंयद्भूतंयच्चभव्यंतद्विष्णोःपरमंपदꣳसदापश्यंतिसूरयःदिवीव

राम॰
१०

चक्षुरात्तमित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमिति वेदानुशासनं ६ अंतः शरीरे निहितो गुहायाम
ज एको नित्यो यस्य पृथिवी शरीरं यः पृथिवीमंतरे संचरन्यं पृथिवी न वेद यस्यापः शरीरं यो पोंतरे संचरन्यमापो
न विदुः यस्य तेजः शरीरं यस्तेजोंतरे संचरन्यं तेजो न वेद यस्य वायुः शरीरं यो वायुमंतरे संचरन्यं वायुर्न वेद यस्या
काशः शरीरं य आकाशमंतरे संचरन्यमाकाशो न वेद यस्य मनः शरीरं यो मनोंतरे संचरन्यं मनो न वेद यस्य बुद्धिः श
रीरं यो बुद्धिमंतरे संचरन्यं बुद्धिर्न वेद यस्याहंकारः शरीरं योहंकारमंतरे संचरन्यमहंकारो न वेद यस्य चित्तं शरीरं य
श्चित्तमंतरे संचरन्यं चित्तं न वेद यस्याव्यक्तं शरीरं योव्यक्तमंतरे संचरन्यमव्यक्तं न वेद यस्याक्षरं शरीरं योक्षरमंतरे
संचरन्यमक्षरं न वेद यस्य मृत्युः शरीरं यो मृत्युमंतरे संचरन्यं मृत्युर्न वेद स एष सर्वभूतांतरात्मापहतपाप्मा दिव्यो
देव एको नारायण एतां विद्यामपांतरतमाय ददावपांतरतमो ब्रह्मणे ददौ ब्रह्मा घोरांगिरसे ददौ घोरांगिरा रयिक्वा
य ददौ रयिक्वो रामाय ददौ रामः सर्वेभ्यो भूतेभ्यो ददावित्येतन्निर्वाणमनुशासनमिति वेदानुशासनम् ७ अंतः

शरीरे यो गुहायां शुद्धः सोयमात्मा सर्वस्य मेदोमांसवसाकीर्णे शरीरे मध्ये दुर्गंधे त्यंतोपहते नेवित्र मितिप्रकाशे गंध
र्वनगरोपमे कदलीसारनिःसारे जलबुद्बुदवच्चंचले निःस्तत्मानमचिंत्यमरूपं दिव्यं देवमसंगंशुद्धं तेजस्कारमयं सर्व
रूपं सर्वेश्वरमचिंत्यमशरीरं निहितं गुहायाममृतं विभ्राजमानं दं तं पश्यंति विद्वांसस्तेन लयेन यस्यंति ८ अथ है
नं रयिकः पप्रच्छ भगवन्कस्मिन्सर्वेस्तं गच्छंतीति तस्मै स होवाच चक्षुरेवाप्येति चक्षुरेवास्तमेति द्रष्टव्यमेवाप्येति यो द्र
ष्टव्यमेवास्तमेति आदित्यमेवाप्येति य आदित्यमेवास्तमेति विराजामेवाप्ये विराजामेवास्तमेति प्राणमेवाप्येति यः प्राणमे
वास्तमेति विज्ञानमेवाप्येति यो विज्ञानमेवास्तमेवि आनंदमेवाप्येति य आनंदमेवास्तमेति तुर्यमेवाप्येति यस्तुर्यमेवा
स्तमेति तदमृतमभयमशोकमनंतं निर्वीजमेवाप्येतीति होवाच श्रोत्रमेवाप्येति यः श्रोत्रमेवास्तमेति श्रोतव्यमे० यः
श्रोतव्यमे० दिशमे० यो दिशं० सुदर्शना० यः सुदर्शनामे० अपानमेवा० योपानमेवा० विज्ञानमेवा० यो विज्ञानमेवा० आ
नंदमेवा० य आनंदमेवा० तुर्यमेवा० यस्तुर्यमेवा० तदमृतमभय० वाच नासामेवा० यो नासामेवा० घ्रातव्यमेवा०

योघ्रातव्यमेवा॰ पृथिवीमेवा॰ यः पृथिवीमेवा॰ जित्तामेवा॰ योजित्तामेवा॰ व्यानमेवा॰ योव्यानमेवा॰ विज्ञानमेवा
वा॰ योविज्ञानमेवा॰ आनंदमेवा॰ यआनंदमेवा॰ तुर्यमेवा॰ यस्तुर्यमेवास्तमेति तदमृतम॰ वाच जिह्वामेवा॰ योजि
ह्वामेवा॰ रसयितव्यमेवा॰ योरसयितव्यमेवा॰ वरुणमेवा॰ योवरुणमेवा॰ सोम्यामेवा॰ यः सोम्यामेवा॰ उदान
मेवा॰ यउदानमेवा॰ विज्ञान॰ आनंदमेवा॰ यआनंदमेवा॰ तुरीयमेवा॰ यस्तुरीयमेवा॰ यस्तुरीयमेवा॰ तदमृ॰
वाच॥ त्वचमेवा॰ यस्त्वचमेवा॰ स्पर्शयितव्यमेवा॰ यस्पर्शयितव्यमेवा॰ वायु॰ योवायु॰ मोघा॰ योमोघा॰ समा
न॰ यः समान॰ विज्ञान॰ योविज्ञान॰ आनंद॰ यआनंद॰ तुर्य॰ यस्तुर्य॰ तदमृत॰ वाच॥ वाच॰ योवाच॰ वक्तव्य॰ यो
वक्तव्य॰ अग्नि॰ योग्नि॰ कुमारा॰ यः कुमारा॰ वैरंभ॰ योवैरंभ॰ विज्ञान॰ आनंद॰ तुर्य॰ तदमृत॰ वाच हस्त॰ योह
स्त॰ आदातव्य॰ यआदातव्य॰ इंद्र॰ यइंद्र॰ अमृता॰ योमृता॰ मुख्य॰ योमुख्य॰ विज्ञान॰ आनंद॰ तुर्य॰ तदमृत॰
वाच॥ पाद॰ यः पाद॰ गंतव्य॰ योगंतव्या॰ विष्णु॰ योविष्णु॰ सत्या॰ यः सत्या॰ अंतर्याम॰ योतंर्याम॰ विज्ञान॰ आ

नंद०तुरीय०तदमृत०वाच पायु०यः पायुः विसर्जयितव्य०योविसर्जयितव्य०मित्र०योमित्र०मध्यमा०योमध्यमा०प्र
भंजन०यःप्रभंजन०विज्ञान०आनंद०तुर्य०तदमृ०वाच॥ उपस्थ०यउपस्थ०आनंदयितव्य०यआनंदयितव्य०प्रजा
पति०यःप्रजापति०नाडीमेवा०योनाडीमेवा०कुमार०यःकुमार०विज्ञान०आनंद०तुरीय०यस्तुरीय०तदमृत०वाच
॥मनएवयोमनएवमंतव्य०योमंतव्य०चंद्र०यश्चंद्र०शिशु०श्येन०यःश्येन०विज्ञान०आनंद०तुरीय०तदमृत०वाच बुद्धि०
योबुद्धि०बोद्धव्य०योबुद्धि०बोद्धव्य०योबोद्धव्य०ब्राह्मण०योब्राह्मण०सूर्य०यःसूर्य०कृष्ण०यःकृष्ण०यःकृष्णा०वि
ज्ञानं०आनंद०तुरीय०तदमृत०वाच।अहंकार०योहंकार०अहंकर्तव्य०योहंकर्तव्य०रुद्र०योरुद्र०असुरा०योसुरा०
श्वेत०यःश्वेत०विज्ञान०आनंद०तुरीय०तदमृत०वाच॥चित्त०यश्चित्त०चेतयितव्य०क्षेत्रज्ञ०यःक्षेत्रज्ञ०भास्वती
०नाग०योनाग०विज्ञान०आनंद०तुरीय०तदमृतमभयमशोकमनंतंनिर्बीजमेवाप्येतीतिहोवाच। यएवंनिर्बीजंवेद
निर्बीजएवसभवतिनजायतेनम्रियतेनमुह्यतेनभिद्यतेनदह्यतेनछिद्यतेनकुप्यतेसर्वदहनोयमित्याचक्षतेनैवाय

मात्माप्रवचनशतेनापिलभ्यतेनचैवह्यश्रुतेननमेधयानवेदैर्नेयज्ञैर्नतपोभिरुग्रैर्नसांख्यैर्नयोगैर्नाश्रमैर्नान्यैरा
त्मानमुपलभंतेप्रवचनेनप्रशंसयानुत्थानेनतमेतंब्राह्मणाःशुश्रुवांसोनूचानाउपलभंतेशांतोदांतउपरतस्ति
तिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्यतिससर्वस्यात्माभवतियएवंवेद ९ अथहैनंरथितरःपप्रच्छभगवन्क
स्मिन्सर्वेसंप्रतिष्ठिताभवंतीतिरसातलहोवाचरसातललोकेइतिहोवाचकस्मिन्रसातललोकाओताश्चप्रोताश्चे
तिभूर्लोकेइतिहोवाचकस्मिन्भूर्लोकाओताश्चप्रोताश्चेतिभुवर्लोकइतिहोवाचकस्मिन्भुवर्लोकाओताश्चेतिसुव
र्लोकेइतिहोवाचकस्मिन्सुवर्लोकाओताश्चताश्चेतिमहर्लोकइतिहोवाचकस्मिन्महः०इतिजनोलोके०चकस्मि
ञ्जनोलोका०इतितपोलो०वाचकस्मिंस्तपो०इतिसत्यलोके०वाचकस्मिन्सत्य०इतिप्रजापति०वाचकस्मिन्प्रजाप०इतिब्रह्मलो
केइति०वाचकस्मिन्ब्रह्मलोका०इतिसर्वलोके०वाचसर्वलोकाआत्मनिब्रह्मणिमणयइवौताश्चप्रोताश्चेतिहो
वाचएवमेतान्लोकानात्मन्येवप्रतिष्ठितान्वेदात्मैवभवतीतिवेदानुशासनं १० अथहैनंरथितरःपप्रच्छभगवन्योयंवि

सुबाल० २०

20

त्रा नद्य नउत्क्रामन्त्सकेनकतरद्वावस्थात्मुत्क्रज्योत्क्रामतीतितस्मैसहोवाचहृदयस्यमध्येलोहितंमांसपिंडंयस्मिं
स्तद्दहरंपुंडरीकंकुमुदमिवानेकधाविकसितंतस्यमध्येसमुद्रःसमुद्रस्यमध्येकोशस्तस्मिन्नाड्यश्चतस्रोभवंतिर
मारमेच्छापुनर्भवेतितत्ररमापुण्येनलोकंनयत्यरमापापेनपापमिच्छयापमिच्छयायत्स्मरतितेनदमिसंपद्यतेअपु
नर्भवयाकोशंभिनत्तिकोशंभित्वामनोभिनत्तिमनोभित्वाशीर्षकपालंभिनत्तिशीर्षकपालंभित्वापृथिवींभिनत्तिपृथि
वींभित्वापोभिनत्तिआपोभित्वातेजोभिनत्तितेजोभित्वावायुंभिनत्तिवायुंभित्वाकाशंभिनत्तिआकाशंभित्वामनो
भिनत्तिमनोभित्वाभूतादिंभिनत्तिभूतादिंभित्वामहांतंभिनत्तिमहांतंभित्वाव्यक्तंभिनत्तिअव्यक्तंभित्वाक्षरंभिनत्तिअक्ष
रंभित्वामृत्युंभिनत्तिमृत्युर्वैपरेदेवएकीभवतिपरस्मिन्परस्तान्नसन्नासन्नसदसदित्येतंनिर्वाणमनुशासनमितिवेदानु
शासनमितिवेदानुशासनम्॥११॥नारायणाद्वाअन्नमागतंपक्वंब्रह्मलोकेमहासंवर्तकेपुनःपक्वंकव्यादिपुनःपक्वंज्वा
लेश्लिष्टंपर्युषितंपूतमयाचितमसंक्लृप्तमश्नीयान्नकंचनयाचेत॥ बाल्येननिष्ठासेद्वानस्वभावोसंगोनिरवद्योमौने

रा म०
२०

नापांडित्येन निरधिकारित्वेयोपलभ्यतेव्यक्तव्यमुक्त निगमनः प्रजापतिरुवाचमहत्पदंज्ञात्वा वृक्षमूलेवसेत्कुचेलोस
हायएकाकी समाधिस्थ आत्मकाम आप्तकामो निष्कामो जीर्णकामो व्याघ्रेहस्तिनि सिंहे दंशे मशके नकुले सर्पे
यक्षराक्षस गंधर्वे मृत्योरूपाणि विदित्वा न बिभेति कुतश्चनेति वृक्षमिव तिष्ठासेच्छिद्यमानो न कुप्येत न कंपेतोप
लमिव तिष्ठासेच्छिद्यमानो न कुप्येत न कंपेताकाशमिव तिष्ठासेच्छिद्यमानो न कुप्येत न कंपेत सत्येन तिष्ठासेत्सत्यो
यमात्मा सर्वेषामेव गंधानां पृथिवी हृदयं सर्वेषामेव रसानामापो हृदयं सर्वेषामेव रूपाणां तेजो हृदयं सर्वेषामेव स्प
र्शानां वायुर्हृदयं सर्वेषामेव शब्दानामाकाशो हृदयं सर्वेषामेव गतीनामव्यक्तं हृदयं सर्वेषामेव सत्वानां मृत्युर्हृदयं मृ
त्युर्वै परे देव एकीभवति परस्मिन् परस्तान्न सन्नासन्न सदसादित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमिति वेदा
नुशासनम् ॥ १३ पृथिवी वा अन्नमापो अन्नादा आपो वा अन्नं ज्योतिरन्नादं ज्योतिर्वा अन्नं वायुरन्नादो वायुर्वा अन्नमाका
शो अन्नाद आकाशो वा अन्नमिंद्रियाण्यन्नादानींद्रियाणि वा अन्नं मनो अन्नादो मनो वा अन्नं बुद्धिरन्नादा बुद्धिर्वा अन्नमव्यक्तम

त्वादत्त्यमव्यक्तं वा अन्नमक्षरमत्त्वादमक्षरं वा अन्नं मृत्युरत्त्वादो मृत्युर्वै परे देव एकीभवति परस्मिन्परस्तान्न सन्नासन्नस
दसदित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥१४ अथ हैनं रैक्वः पप्रच्छ भगवन्योऽयं विज्ञा
नघन उत्क्रामन्स केन कतरद्वाव स्थानं दहतीति तस्मै स होवाच योऽयं विज्ञानघन उत्क्रामन्प्राणं दहत्यपानं व्यानमुदा
नं समानं वैरंभं मुख्यमंतर्यामं प्रभंजनं कुमारं श्येनं श्वेतं कृष्णं नागं दहति पृथिव्यापस्तेजो वायुराकाशं च दहति जागरि
तं स्वप्नं सुषुप्तिं तुरीयं च दहतीमं च दहतीमं च लोकं परलोकं च दहति लोकालोकं दहति धर्माधर्मं दहत्यभास्करममर्या
दं निरालोकमतः परं दहति महान्तं दहत्यव्यक्तं दहत्यक्षरं दहति मृत्युं दहति मृत्युर्वै परे देव एकीभवति परस्मिन्परस्तान्न
सन्नासदसदित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमिति वेदानुशासनम् १५ सौबालबीजब्रह्मोपनिषन्नाप्र
शान्ताय दातव्या नापुत्राय दातव्या नाशिष्याय नासंवत्सररात्रोषिताय नापरिज्ञातकुलशीलाय दातव्या नैव च प्रव
क्तव्या यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः प्रकाशंते महात्मन इत्येतन्नि

वीणमनुशासनमिति वेदानुशासनमितिवेदानुशासनम्॥१६ इतिसुबालोपनिषत्समाप्ता॥श्रीगुरुभ्यो नमः॥
ॐभद्रं॰शांतिः आपोवाइदं यासन्सलिलमेवन्सप्रजापतिरेकः पुष्करपर्णे भुसुंडः समभवत् तस्यांतन्मनसिकामः
समवर्त्तत।इदं सृजेयमिति।तस्माद्यत्पुरुषोमनसाभिगच्छति।तद्वाचा वदति।तत्कर्मणाकरोति।तदेषाभ्युक्ता
।कामस्तदग्रेसमवर्त्तताधि मनसोरेतः प्रथमंयदासीत् सतोवंधुमसतिनिरविदन् हृदिप्रतीष्याकवयोमनीषेति
।उपैनंतदुपनमति यत्कामोभवति यएवंवेद।सतपोतप्यत सतपस्तप्त्वासएनं भुसुंडः कालाग्निरुद्रमगामत् आ
गत्यभोपितः विभूतिमाहात्म्यंब्रूहीतिसहोवाच।तथेतिभस्मवोचत् भुसुंडउच्यमानंकिमिति।विभूतिरुद्राक्षयो
र्माहात्म्यंवभाषेति आदावेवपैप्पलादेनसहोक्तमिति तत्फलश्रुत्यैवेतितस्योर्ध्वंकिंवदामीति।हृहज्जाबालाभि
धांमुक्तिश्रुतिंममोपदेशंकुरुष्वेति।ॐतथेतिसद्योजातंप्रपद्यामिसद्योजाताय वैनमः।भवेभवेनातिभवेभव
स्वमां।भवोद्भवायनमः योदेवानांप्रभवश्चोद्भवश्चविश्वाधिकोरुद्रोमहर्षिः।हिरण्यगर्भंजनयामासपूर्वंसनोदे

वः शुभयास्मत्स्वासंयुनक्तु सद्योजातात्पृथिवी तस्या निवृत्तिः। तस्याः कपिलवर्णा नंदा जाता। तस्या गोमयेन विभूति
र्जाता। वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणा
य नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः। ततः परं ब्रह्म परं हंहं तं यथानि
कायं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वाऽमृता भवंति। वामदेवादुदकं तस्मात्प्रतिष्ठा तस्याः कृ
ष्णावर्णा सुभद्रा नाम भद्रा तस्या गोमयेन भसितं जातं। अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो
नमस्ते अस्तु रुद्ररूपेभ्यः सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम्। सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत्
अघोराद्वह्निः तस्माद्विद्या तस्या इक्तवर्णा सुरभिर्जाता। तस्या गोमयेन भस्म जातं। तत्पुरुषाय विद्महे महादेवाय धी
महि। तन्नो रुद्रः प्रचोदयात्। अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्या
स्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तं। तत्पुरुषाद्वायुः तस्माच्छांतिस्तस्याः श्वेतवर्णा सुशीला जाता। तस्या गोमयेन क्षारं जा

तां। ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। सन्नन्म
योत्वमजईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता। यईशे अस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय। यो
ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये। निष्क
लं निष्क्रियं शांतं निरवद्यं निरंजनं। अमृतस्य परं सेतुं दग्धेंधनमिवानलम्। ईशानादानैकाशस्तस्माच्छांत्यती
तात्तस्याश्चित्रवर्णा सुमना जाता तस्या गोमयेन रक्षा जाता विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः भवंति पंचना
मानि पंचभिर्हेतुभिर्भस्म॥ ऐश्वर्यकारणाद्भूतिर्भस्म सर्वाघहारणात् भासनाद्भसितं प्रोक्तं क्षारणात्क्षारमापदाम्। भू
तप्रेतपिशाचब्रह्मराक्षसापस्मारसंसारभयभीतिभ्योभिरक्षणाद्रक्षेति। त्रिनि मुक्तिस्मृत्यभिधेयौ यांह्यह ज्ञात्वा
लोपनिषदि प्रथमं ब्राह्मणम्। अथ भुसुंडः कालाग्निरुद्रमग्नीषोमात्मकं भस्मस्नानविधिं पप्रच्छ। स होवाच प्र
विष्टो रूपं रूपं प्रतिरूपो बभूपो बभूव। एकं भस्म सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहिश्च। अग्नीषोमात्मकं

विश्वमित्यग्निरुच्यते रौद्री घोरा या तैजसी तनुः॥ सोमः शान्तोमृतमयः शान्तिः शान्तिकरी तनुः॥ अमृतं यत्प्रति
ष्ठास्य तेजो विद्याकला स्वयं॥ स्थूलं सूक्ष्मेषु भूतेषु तेज एव सतेजसि द्विविधा तैजसो वृत्तिः सूर्यात्मा वानलात्मि
का तथैव रसशक्तिश्च सौम्या मालाचजलात्मिका॥ विद्युदादिमयं तेजो मधुरादिमयो रसः तेजोरसविभेदैस्तु प्रभवे
तेच्चराचरम् अग्नेरमृतनिष्पत्तिरमृतेनाग्निरेधते अत एव बह्निः कृतमग्नीषोमात्मकं जगत् हविषा सस्य सं
पत्तिर्वृष्टिः सस्याभिवृद्धये वृष्टये च हविस्तस्मादग्नीषोमात्मकं जगत्॥ ऊर्ध्वे शक्तिनमयः सोमो ह्यधः शक्तिम
यो नलः॥ आभ्यां सम्पुटितं तस्मात् शश्वद्विश्वमिदं जगत्॥ अग्निरूर्ध्वं ज्वलत्येषो यावत्सौम्यं परामृतम्॥ यावदा
स्यात्मवृं सौम्यममृतं विसृजत्यधः॥ अतो वह्निः स्वकालाग्निरधस्ताच्छक्तिरूर्ध्वगा तं॥ यावदादहनश्चोर्ध्वमधश्चा
प्लावनं भवेत्॥ आधारशक्त्यवधृतः कालाग्निरयमूर्ध्वगः॥ तथैव निम्नगः सोमः शिवशक्तिपदास्पदं॥ शिवश्चो
र्ध्वमधः शक्तिरूर्ध्वशक्तिरधः शिवः तदित्थं शिवशक्तिभ्यां नाप्या सौम्यमिह किंचन॥ असकृद्वाग्निनादग्धं जगद्भ

स्मसात्कृतम्॥ अग्नेर्वीर्यमिदं प्राहुस्तद्वीर्यं भस्म यत्ततः। यश्चेत्थं भस्मसद्भावं ज्ञात्वाभिस्नाति भस्मना॥ अग्नि
रित्यादिभिर्मन्त्रैर्दग्धपाशः स उच्यते॥ अग्नेर्वीर्यं तु तद्भस्म सोमेनाप्लावितं पुनः। अयोगयुक्त्या प्रकृतेरधिका
राय कल्पते योगयुक्त्या तु तद्भस्म प्लाव्यमानं समन्ततः। सेकेनामृतवर्षेण त्वधिकारान्निवर्त्तते॥ अतो मृत्युं
जयायैतत् अमृतप्लावनं स्मृतम्॥ शिवशक्त्यामृतस्पर्शे लब्ध एव कुतो मृतिः। यो वेद गहनं गुह्यं पावनं च यथा
थोदितम्॥ अग्नीषोमपुटं कृत्वा न स भूयोऽभिजायते। शिवाग्निना तनुं दग्ध्वा शक्तिसोमामृतेन यः। भावयेद्यो
गमार्गेण सोऽमृतत्वाय कल्पते॥ सोऽमृतत्वाय कल्पत इति॥ द्वितीयं ब्राह्मणं॥ अथ भुसुण्डः कालाग्निरुद्रं विभू
तियोगं ब्रूहीति होवाच॥ स होवाच विकटां गामुन्मत्तां महारागां स्वल्पां मलिनामसितादिचिह्नांकितां पुनर्धेनुं
कृशांगां॥ अन्तःशोधपत्रं वत्सहीनां प्रसूतां दुग्धदोहिनीं निरिन्द्रियां जग्धतृणां केशचेलास्थिभक्षिणीम् असं
धिनीं नवप्रसूतां रोगार्दितां गां विहाय प्रशस्ताया गोमयमाहरेत्॥ अन्तःशोधपत्रं गोमयं प्रशस्तं ग्राह्यमशुभे स्या

हृदज्ञा०
२८

24

नैवापतितं परित्यज्यात ऊर्ध्वं मर्द्दयेत् पंचगव्येन गोमयग्रहणं कपिलाया धवलाया वा अलाभेन ह्यन्यागो
स्याद्दोषवर्जिता कपिला भस्मोत्तमं लब्ध्वा गोभंस्मना न चेदन्यगोक्षारं यत्र क्वापि स्थितं च यत्नेन हि धार्यं सं
स्कार्यरहितं धार्यं न कदाचन आगावद्गन्ति मंत्रेण धेनुमधेनुमभिमंत्रयेत् गावो भगो गावद्गन्ति तां प्राघ्राये
त्तृणं जलं तां गामुत्थाप्य यत्नेनाहरेत् गा यस्या गोमूत्रं सौवर्णराजतताम्रमृन्मयपलाशगोशृंगमेवादद्दी
तगंधद्वारेति गोमयं ग्राह्यं बुद्धिमान् गोमयं श्रीर्मे भजत्विति जिघ्रेद्ध्यायेत् अलक्ष्मीर्मे नश्यत्विति तत्रैते श्लोकाः वि
द्याशक्तिः समस्तानां शक्तिरित्यभिधीयते ।। गुणत्रयाश्रया विद्या सा विद्या सा विद्या च तदाश्रया ।। गुणत्रय
मिदं धेनुर्विद्याभूद्गोमयं शुभम् सूत्रं चोपनिषत्प्रोक्तं कुर्याद्भस्म ततः परम् वत्सास्तु स्मृतयश्चास्याः स्तत्सं
भूतं तु गोमयम् ।। आगावद्गन्ति मंत्रेण धेनुं न त्वाभिमंत्रयेत् गावो भगो गावद्गन्ति प्राघ्रायेत्तु तृणं जलम् उषो
ष्यं च चतुर्दश्यां शुक्ले कृष्णेऽथवा व्रती परेद्युः प्रातरुत्थाय शुचिर्भूत्वा समाहितः कृतस्नानो धौतवस्त्रः पयो

राम०
२८

र्थं चव्रजेच्च गाम् उत्थाप्य गां प्रयत्नेन गायत्र्यामूत्रमाहरेत् सौवर्णे राजते ताम्रे धारयेन्मृन्मये घटे पौष्क
रे थ पलाशे वा यात्रे गोशृंगएव वा आददीत हि गोमूत्रं गंधद्वारेति गोमयम् अभूमिपातं गृह्णीयात्मा
त्रे पूर्वोदिते गृही॥गोमयं शोधयेद्विद्वान्श्रीर्मे भजतु मंत्रतः अलक्ष्मीर्मइति मांत्रेण गोमयं स्थापयेत्त
तः सत्वासिंचामि मंत्रेण गोमूत्रं गोमये क्षिपेत्॥पंचानां त्वेति मंत्रेण पिंडानां तु चतुर्दश कुर्यात्संशोध्य
किरणैः सौरकैराहरेत्ततः तिदध्यादथ पूर्वोक्तपात्रे गोमयपिंडकान्॥ततो निधनपतये त्र्यो विंशत्तु दे
ति च॥आघारावाज्यभागौ च प्रक्षिपेच्चाहुतीः सुधीः स्वगृह्योक्तविधानेन प्रतिष्ठाप्याग्निमीडयेत् पिंडांश्च
निक्षिपेत्तत्र आद्यंत प्रणवेन तु॥षडक्षरस्य मंत्रस्य आहुतस्य तथाक्षरैः स्वाहांते तु हुयात्त प्रणवादिवाय
पिंडकान्॥होतव्याः पंच ब्रह्माणि नमो हिरण्यबाहवे इति सर्वा हुतीर्ईशाय चतुर्थ्यंतैश्च मंत्रकैः स्तनं मन्यंक
द्रुद्राय यस्य वक्के कृतीति च एतैश्च जुहुयाद्विद्वान नाज्ञात त्रयं तथा व्याहृतीरथ इलाचत्ततः स्विष्टकृ

तंडुनेन॥इध्मशेषंतुनिर्वर्त्यपूर्णपात्रोदकंतथा पूर्णमसीतियजुषाजलेनान्येनवृंहयेत् ब्राह्मणेघमृतमिति
तज्जलंशिरसिक्षिपेत् प्राच्यामितिदिशांलिंगैर्दिक्षुतोयंविनिक्षिपेत् ब्रह्मणेदक्षिणांदत्वाशांत्यैपुष्टिकमाहरेत्
आदरिष्यामिदेवानांसर्वेषांकर्मगुप्तये जातवेदसमेनंत्वांपुलकैश्छादयाम्यहम् मंत्रेणानेनतंवह्निंपुल
कैश्छादयेत्ततः त्रिदिनज्वलनःस्थित्यैछादनंपुलकंस्मृतम् ब्राह्मणान्भोजयेद्भक्त्यास्वयंभुंजीतवाग्यतः
भस्माधिक्यमभीप्सुस्तुअधिकंगोमयंहरेत् दिनत्रयेणयद्दिवाएकस्मिन्दिवसेथवा तृतीयेवाचतुर्थेवा
प्रातःस्नात्वासितांवरः शुक्लयज्ञोपवीतीचशुक्लमाल्यानुलेपनः शुक्लदंतोभस्मदिग्धोमंत्रेणानेनमंत्रवित्॥
ओतद्बहोतिचोच्चार्यपोलाकंभस्मसंत्यजेत् तत्रआवाहनमुख्याउपचारास्तुषोडश कर्तव्याःप्यात्वारुत्वंततो
ऽग्निमुपसंहरेत्॥अग्निर्भस्मेतिमंत्रेणगृह्णीयाद्भस्मचोत्तरम्।अग्निरस्मीतिमंत्रेणप्रमृज्यचततःपरं।संयोज्यंगं
गासलिलैःकपिलामूत्रकेणवा चंद्रकुंकुमकाश्मीरमुशीरंचंदनंतथा अगरुत्रितयंचैवचूर्णयित्वातुसूक्ष्मतः

क्षिपेद्भस्मनि तच्चूर्णमोमिति ब्रह्ममंत्रतः प्रणवेनाहरेद्विद्वान्त्र्यहेति वटकानथ॥ अणोरणीयानिति हि मंत्रेण च
क्षणः इत्थं भस्म सुसंपाद्यं शुष्कमादाय मंत्रवित्॥ प्रणवेन विमृज्याथ सप्तप्रणवमंत्रितम् ईशानेति शि
रो देशे मुखं तत्पुरुषेण तु उरोदेशमघोरेण गुह्यं वामेन मंत्रयेत् सद्योजातेन वै पादौ सर्वांगं प्रणवेन तु॥ त
त उद्धूल्य सर्वांगमापादतलमस्तकम् आचम्य वसनं धौतं ततश्चैतत्सधारयेत् पुनराचम्य कर्मस्वं कर्तुम
र्हति सर्वत इति गोमयं स्थापयेत् संवासिं चामीति गोमूत्रं गोमये सिंचेत् पंचानां त्वावाताना मिति पिंडांश्चैव चतु
र्दशा कुर्यात् स तत्र किरणैः संशोष्य किरणैरा तत्स किरणैः संशोष्य करैरात्हत्स गान्मात्रे पिंडान्त्रातिष्ठाप्य स्वगृह्यो
क्त विधिनाप्यग्निमिंधयेत् आद्यंतं प्रणवेनाग्नौ प्रक्षिपेत् मंत्रस्य षडक्षरस्य व्याहृतस्याक्षरैः स्वाहांतं जुहुयात्
वर्णदेवाय पिंडकान् मुखांते दातव्याः शतरुद्रीय पंचब्रह्ममंत्रान्नमो हिरण्यवाहव इति चतुर्थ्यंतं स्वनं सत्संप
रं ब्रह्मा कद्रुद्राय यस्य वैकंकतीति समाप्य शांत्यै पैलके श्रावयेत् स्विन्त्रये णान्वाहांतं कुर्यात् वर्णदेवाय पौल

बृहज्जा॰
२६
26

कंभस्मपरित्यज्यपूजांकुर्यात्।अग्निरितिभस्मेत्युत्तमंभस्मगृह्णीयात्।अग्नेरस्मीतिप्रमृज्यच।संयोज्यगंगा
दिसलिलैःकपिलामूत्रेणवाप्रणवेनावाहयेत् बृहन्तोयेदिनत्रयेणयदिवाएकस्मिन्दिवसेवाओंतद्ब्रह्मेतिचिंता
वटकाननोरणीयानिति अथचतुर्विधंभस्माकल्पंप्रथमंअनुकल्पंद्वितीयंउपकल्पंतृतीयंप्रकल्पंचतुर्यंअग्निहो
त्रसमुद्भूतंविरजानलजंकल्पमेवनेष्यंगोशकृत्संगृह्यकल्पोक्तविधिनाकल्पितमनुकल्पंपिंडकल्पंस्यात्अरण्येशु
ष्कगोमयंचूर्णीकृत्यसुसंगृह्यगोमूत्रैःपिंडवत्कृतैः संस्कारंकल्पवदुपकल्पमभिधीयतेशिवालयगतंप्रक
ल्पंइत्थंचतुर्विधंभस्मपापंनिकृंतयतिमोक्षंददातीत्याहभगवान्कालाग्निरुद्रः॥ इतितृतीयब्राह्मणं अथभु
सुंडःकालाग्निरुद्रंभस्मस्नानंब्रूहीतिविधिर्होवाचअथप्रणवेनविमृज्यसप्तप्रणवासभिमंत्रितं आगमेनमेनै
यदिग्धंधंकारयेत्पुनः शेषंतेनास्त्रमंत्रेणांगानिमूर्धादीन्युद्धूलयेन्मलस्नानमिदंअथविधिस्नानमीशानाद्यैः
पंचभिर्ब्रह्ममंत्रैस्तनुंक्रमादुद्धूलयेत्ईशानेनशिरोदेशंमुखंतत्पुरुषेणतु उरोदेशमघोरेणगुह्यंवामेनपू

राम

लंयेत् सद्योजातेनपादौचसर्वांगंप्रणवेनतु आपादतलमस्तकं न तदुद्धूल्यावम्यवसनंधौतंधौतंप्रधारये
त् विधिस्नानमिदं तंत्रेतेम्लोकाः भस्ममुष्टिंसमादायसंहितामंत्रमंत्रिताम् । मस्तकात्पादपर्यंतंमलस्नानं
पुरोदितम् शन्मंत्रेणचकर्तव्यंविधिस्नानंसमाचरेत् ईशानात्पंचधाभस्मविकिरेन्मूर्द्धियत्नतः मुखेचतु
र्धातत्पुरुषेणैवंअघोरेणाष्टधाहृदि वामेनगुह्यदेशेतुत्रिदशस्थानभेदतः अष्टचः सद्योमंत्रेनापादावु
द्धूल्ययत्नतः सर्वांगोद्धूलनंकार्यंतानन्यस्ययथाविधि मुखंविनाचतत्सर्वमुद्धूल्यक्रमयोगतः संध्यात्रये
निषिद्धेवनथीपूर्वावसानयोः सुप्त्वाभुक्त्वापयःपीत्वाकृत्वाचावश्यकादिकम् स्त्रियंनपुंसकंगृध्रंबिडालं
बकमूषिकम् स्पृष्ट्वातथाविधानंस्नानंभस्मस्नानंसमाचरेत् । देवाग्निगुरुविप्राणांसमीपेंत्यजदर्शने
अभ्युद्धम् तलेमार्गेकुर्याच्चोद्धूलनंव्रती शंखतोयेनमूत्रेनभस्मनामिश्रणंभवेत् । योजितंचंदनेनापिवा
रिणासंपुमंतुवा । चंदनेनसमंलीपेज्ज्ञानार्थीचूर्णमेवतत् । मध्यान्हात्माकजलेयुक्तंतोयंतदनुवर्जयेत् अ

वृहज्जा०
२७
27

यभुसुंडेभगवंस्तंकानानिरुह्यत्रिपुंड्रविधिंपप्रच्छानत्रैतेश्लोकाः त्रिपुंड्रकारमेत्यस्माद्धूल्यविभुश्शिवात्मकं
।मध्यांगुलिभिरादायतिसृभिर्मूलमंत्रतः अनामामध्यमांगुष्ठैरथवास्यात्त्रिपुंड्रकं। उद्धूलयेन्मुखंविप्रः क्ष
त्रियस्तुच्छिरोदितं द्वात्रिंशत्स्थानकेवाथषोडशस्थानकेपिवा।अष्टस्थानेतथाचैवपंचस्थानेनियोजयेत्।उ
त्तमांगेललाटेचकर्णयोर्नेत्रयोस्तथा।नासावक्त्रगलेष्वेवमंसयोश्चद्वयोरपि।कूर्परेमणिबंधेचहृदयेपा
र्श्वयोर्द्वयोः नाभौगुह्यद्वयेचैवमूर्वोःस्फिग्विंबजानुषु।जंघाद्वयेचपादेद्वेद्वात्रिंशत्स्थानमुत्तमं।अष्टमूर्त्त्य
ष्टविधेशानदिक्पालान्वसुभिःसह।धरोध्रुवश्चसोमश्चआपश्चैवानिलोनलः।प्रत्यूषश्चप्रभासश्चवसवो
ष्टावुदीरिताः एतेषांनाममंत्रेणत्रिपुंड्रकार्यवद्बुधः।विदध्यात्षोडशस्थानैस्त्रिपुंड्रंतुसमाहितः शीर्षकेच
ललाटेचकंठेचांसद्वयोरपि।कूर्परेमणिबंधेचहृदयेनाभिपार्श्वयोः।पृष्ठेचैवंप्रतिस्थानंजपेत्तत्राधिदेवताः
शिवंशक्तिंचसादाख्यमीशंरुद्राख्यमेवच।वामादिनवशक्तिश्चएताःषोडशदेवताः।नासत्योदस्रकश्चैवअ

राम
२७

श्विनौद्वौ समीरितौ॥ अथवा मूर्धके चैव कर्णयोः श्वसने तथा बाहुद्वये च हृदये नाभ्यामूर्वोर्युगे तथा॥ जानु
द्वये च पदयोः पृष्ठभागे च षोडश। शिवस्कंदश्च चंद्रार्कौ विघ्नेशो विष्णुरेव च शीर्षे च हृदये चैव तथा नाभौ प्र
जापतिः नागाश्च नागकन्याश्च उभयोर्ऋषिकन्यकाः पादयोश्च समुद्राश्च तीर्थान्पृष्ठे पि शाखक एवं ततः
षोडशाख्याने मष्टस्थानमथोच्यते ऊरुस्थानं ललाटं च कर्णद्वयमनंतरम् अंसयुग्मं च हृदयं नाभिरित्यष्ट
मं भवेत् ब्रह्मा च ऋषयः सप्त देवताश्च प्रकीर्तिताः अथवा मस्तकं बाहू हृदयं नाभिरेव च पंचस्थानान्यमू
न्याहुर्भस्मतत्त्वविदो जनाः यथासंभवतः कुर्याद्देशकालाद्यपेक्षया उद्धूलने प्यशक्तश्चेत्त्रिपुंड्रादीनि का
रयेत्॥ ललाटे हृदये नाभौ गले भुजयुगेपि च बाहुमध्ये मणिबंधे पृष्ठे पर गले शिरः ललाटे ब्रह्मणे नमः हृद
ये हव्यवाहनाय नमः। नाभौ स्कंदाय नमः गले पृथ्व्यै नमः दक्षिणबाहुमूले रुद्राय नमः मध्ये आदित्याय नमः म
णिबंधे शशिप्रभाय नमः वामबाहुमूले वामदेवाय नमः मध्ये प्रभंजनाय नमः मणिबंधे वसुभ्यो नमः पृष्ठे॰

शेहरायनमः वृह्निकंठेनीलकंठायनमः पार्श्वयोः शिवशंकराभ्यांनमः।शिरसिपरमात्मनेनमः सर्वांगेसदाशि
वायनमः ध्यानं भूतिर्भूतिकरीपवित्रजननीपापौघविध्वंसिनीसर्वानंदकरीसदाशिवकरीसर्वार्थसंपत्करी
रक्षोभूतपिशाचराक्षसमहाक्षोभैकसंत्रायिनीतेजोराज्यविशेषमोक्षकरणीभूतिः सदाधार्यताम्॥एतानि
तानिशिवमंत्रपवित्रितानिभस्मानिकामदहनागविलेपनानि त्रैपुंड्रकानिरचितानिललाटपट्टेलुंपंतिदैवलि
खितानिदुरक्षराणि श्रीकरंचपवित्रंचशोकरोगनिवारणम् लोकवश्यकरंपुण्यंभस्मंत्रैलोक्यपावनम्॥त्रि
नेत्रंत्रिगुणाधारंत्रयाणांजनकंविभुम् स्मरन्नमः शिवायेतिललाटेतुत्रिपुंड्रकम्॥ईशानाभ्यांनमेत्युक्त्वापा
र्श्वयोश्चत्रिपुंड्रकम्॥भुजाभ्यांनमइत्युक्त्वाधारयेत्तुप्रकोष्ठयोः॥कूर्पराधःपितृभ्यांचउमेशाभ्यांतथोपरि
भीमायेतीतरः पृष्ठेशिरसः पश्चिमेतथा नीलकंठायशिरसिक्षिपेत्सर्वात्मनेनमः पापंनाशयतेकृत्स्नमपिजन्म
शतार्जितम् कंठोपरिकृतंपापंनष्टंस्याद्भस्मधारणात् कंठेचधारणात्कंठभोगादिकृतपानकम् बाह्वोर्बाहुकृ

तंपापंवक्षंसुमनसाकृतम् नाभ्यांशिश्नकृतंपापंपृष्ठेगुदकृतंतथा पार्श्वयोर्धारणात्पापंपरस्त्र्यालिंगप्रारि
कम् तद्भस्मधारणंमुख्यंसर्वत्रैवैचिपुंड्रकम् ब्रह्मविष्णुमहेशानांत्र्यग्नीनांचधारणम् गुणलोकत्रयाणां
चधारणंतेनवैकृतम्॥ इतिचतुर्थब्राह्मणम्॥ मानस्तोकेतिमंत्रेणमंत्रितंभस्मधारयेत्॥ ऊर्ध्वपुंड्रंभवेत्सा
ममध्यपुंड्रंयजूंषिच॥ अधःपुंड्रमृचःसाक्षात्तस्मात्पुंड्रंत्रियायुषम् त्रियायुषाणिकुरुतेल्ललाटेचभुजद्वये
नाभौशिरसिहृत्पार्श्वेब्राह्मणःक्षत्रियःसदात्रैवर्णिकानांसर्वेषांअग्निहोत्रसमुद्भवम् इदंमुख्यगृहस्था
नांविरजानलजंभवेत्॥ विरजामुत्पन्नगृहस्थानांविशेषतःसमिदग्निदग्निसमुत्पन्नंधार्यंवैब्रह्मचारिणां
शूद्राणांश्रोत्रियागारपचनाग्निसमुद्भवम् यतीनांज्ञानदंप्रोक्तंवनस्थानांविरक्तिदं अतिवर्णाश्रमाणांन
लजंचैवधार्यंप्रोक्तंमनीषिभिः औपासनसगारेपचनाग्निसमुद्भवम् अन्येषामपिसर्वेषांश्मशानाग्निस
मुद्भवम् त्रैवर्णिकानांअग्निहोत्राग्निजमग्रहस्थानांविरजानलजंविवाहाग्निजमौपासनाग्निजंवाब्रह्मचारि

णां समिदग्निजं शूद्राणां श्रोत्रियागारपचनाग्निजम् अन्येषां दावानलसमुद्भूतं यतीनां सर्वत्रावस्थितं अतिवर्णा
श्रमिणां श्मशानगतं सर्वेषां देवालयस्थितमिति शिवयोनिनां शिवाग्निहोत्रजा विभूतिः शिवालयस्थितल्लिंग
लिप्तमन्त्रसंस्कारदग्धं वा तत्रैते श्लोकाः॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम्॥ येन विप्रेण शिरसि त्रिपुंड्रं
भस्मना धृतम्॥ त्यक्तवर्णाश्रमाचारो लुप्तसर्वक्रियोपि यः सकृत्तिर्यक् त्रिपुंड्रांको धारणात्सोपि पूज्यते॥ ये भस्म
धारणं मुक्त्वा कर्म कुर्वंति मानवाः तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः॥ महापातकयुक्तानां पूर्वजन्म
नि संस्कृतिः त्रिपुंड्रोद्धूलने द्वेषो जायते सुदृढं बुध॥ येषां कोपो भवेद्ब्रह्मन् ललाटे भस्मदर्शनात् तेषामुत्पत्तिसां
कर्यमनुमेयं विपश्चिता॥ ये भस्मधारणं दृष्ट्वा बावानि मानवाः तेषां शूद्रेप संभूतिरनुमेया विपश्चिता॥ ये स्मभे
धारणं दृष्ट्वा नराः कुर्वंति ताडनम्॥ तेषां चंडालतो जन्म ब्रह्मन्नूह्यं विपश्चिता॥ येषां नास्ति मुने श्रद्धा श्रौते भस्म
नि सर्वदा॥ गर्भाधानादिसंस्कारस्तेषां नास्तीति निश्चयः॥ त्रिपुंड्रं ये विनिंदंति शिवमेव ते धारयंति तु ये भक्त्या धा

रयंतितमेवते धिग्भस्मरहितंकालंधिग्ग्राममशिवालयम् धिगनीशार्चनंजन्मधिग्विद्यामशिवाश्रयाम्
रुद्राग्नेर्यत्परंवीर्यंतद्भस्मपरिकीर्तितम् तस्मात्सर्वेषुकालेषुवीर्यवान्भस्मसंयुतः भस्मनिष्ठस्यदह्यंतेदोषाभ
स्माग्निसंगमात् भस्मस्नानविशुद्धात्माभस्मनिष्ठइतिस्मृतः भस्मसंदिग्धसर्वांगोभस्मदीप्तत्रिपुंड्रकः भ
स्मशायीचपुरुषोभस्मनिष्ठइतिस्मृतः इतिपंचमंत्राह्मणम् अथभुसुंडःसहोवाचनामपंचकस्यमाहात्म्यंमा
ब्रूहीतिराहोवाचअथवासिष्ठवंशजस्यशानभार्यासमेतस्यधनंजयस्यब्राह्मणस्यज्येष्ठभार्यायाःकनिष्ठःपु
त्रःकरुणेइतिनामातस्यशुचिस्मिताभार्याअसौवैकरुणोभ्रात्वैरमसहमानोभवनाशिनीतटेकालाग्नि
रुद्रंभगवंतंनृसिंहमगमत् तत्रदेवसमीपेअन्येनोपायनार्थंसमार्पितंजंबीरफलंगृहीत्वाजिघ्रन्नदातंतत्र
स्थाअज्ञपन्पापमक्षिकोभवबर्षाणांशतमितिसोपिशापमादायमक्षिकःसन्स्वकेषुस्वकेष्टितंतस्येमिवे
दमांरक्षेतिस्वभार्यामवदत् तदामक्षिकोभिवतज्ञांतिमेवंविधंज्ञात्वयसौलमध्येस्यमारयन्सामर्ज्जपति

मादाय अरुंधतीमगमत् अवदद्ब्रह्मा शुचिस्मिते शोकेनालमरुंधत्या हा मुंसंजीवयाम्यघविभूतिमादाय शुचि
स्मितइति अथैषाग्निहोत्रजं भस्मारुंधत्यै न्यवेदयत्सा अरुंधती च मृत्युंजयेति मंत्रेण मृतजं तौ तदाक्षिपत् मं
दवाशु सुततोजज्ञे व्यजने न शुचिस्मिता उदतिष्ठत तो जंतुर्भस्मनोस्य प्रभावतः ततो वर्षशते पूर्णे ज्ञातिरेको प्यमा
रयन्मुः॥ भस्मैव जीवयामास कश्यपं च तया विधं देवानपि महाभूता न्मायैरप्येतादृशं पुरा तस्मात् भस्मना
जंतुं जीवयामि सदानघे इत्येवमुक्ता भगवान्कथितः समजायत स्वरूपं च ततो गत्वा स्वगाश्रमपदं यथाविति
इदानीमस्य भस्मनः सर्कर्मेक्षणसामर्थ्यं विद्यत इत्याइस्याह गौतमविवाहकाले तामहल्यां दृष्ट्वा सर्वे देवाः कामा
तुरा अभवन् तदा नष्टज्ञानाद्दूर्वाससं गत्वा प्रपच्छुः स तु दोषं शमयिष्यामीत्युवाच ततः शतरुद्रेण मंत्रेण मंत्रितं भस्म
वैपुरा मयापि दत्तं तेनो प्रपद्य हत्यादिशांतये इत्येवमुक्ता दूर्वासा दत्तवान्भस्म चोत मम जाता सा द्वचनात्सर्वैपू
यं तेक्तृत केनसः शतरुद्रियमंत्रेण भस्मोद्धूलितविग्रहाः निर्धूतरजसः सर्वे तत्क्षणाच्च वयं मुने आश्चर्यमतज्जा

नीमोभस्मस्यामर्थ्यमीदृशम् अस्यभस्मनः शक्तिमन्यांशृणु वएतदेवहरिश्चाकरयोर्ज्ञानप्रदंब्रह्महत्यादि
पापनाशकमिति महाविभूतिप्रदमितिशिवः स्ववक्षसिस्थितंभस्मनखेनादायप्रणवेनाभिमंत्र्यगायत्र्याय
चाक्षरेणाभिमंत्र्यहरिमस्तकगात्रेषुसमाक्षिपत् तदाहदिव्यापश्वेतिहरिमुक्ताशिवेहरिः स्वदृदिव्यालादृष्टा
दृष्टइतिशिवमाहतदाहरिंभस्मभक्षयेत्याहहस्ततः भक्षयिष्येत्रिवंभस्मस्यात्वाहंभस्मनापुरो दृष्टेश्वरंभक्ति
स्मगम्यंभस्मांभयदच्युतः तत्राश्चर्यमतीवासीत्प्रतिविंवसमद्युतिः वासुदेवः शुद्धमुक्तोमलवणाभवक्षणा
त् तदाप्रभृतिशुक्लाभोवासुदेवःप्रशंसनात् नशक्तिंभस्मनोज्ञानेप्रभावंनेकुतोविभो नमस्तेस्तुनमस्तेस्तु
त्वामेवशरणंगतः त्वत्पादयुगलेशंभोभक्तिरस्तुसदामम भस्मधारणसंपन्नोममभक्तोभविष्यसीति अत
एवैषाभूतिर्भूतिकरीप्रोक्तातत्त्वज्ञैः तद्भूतज्ञावालं सर्वकामदंमोक्षद्वारंशांभवं यंयजुर्मयंसाममयंब्रह्ममयममृत
मयंभवतितस्यपुरस्ताद्वसवश्चासतेरुद्रादक्षिणतआदित्याःपश्चाद्विश्वेदेवाउत्तरतोब्रह्मविष्णुमहेश्वरानाभ्यांस्

बृहज्जा॰
३१

र्यश्चंद्रमसोपार्श्वयोस्तदेतदृचाभ्युक्तं ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः यस्तं न वेद किमृचा
करिष्यति य इत्तद्विदुस्त इमे समासत इति तद्वा एतद्बृहज्जाबालं बालो वायुर्वा वावेद स महान्भवति स गुरुः सर्वेषां
मंत्राणामुपदेष्टा भवति एतयैव होमं कुर्यादेतयैवार्चनं कुर्यात्तदेतद्रहस्योपघ्रंम्स्तु तारकं गुरुणा लब्धं कंठे वाहौ त्रि
खायां वा बध्नीत सप्तद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया यां कांचिद्गां दद्यात्सा दक्षिणा भवति। त
स्मादिदं बृहज्जाबालं येन केनचिदाचार्यमुखेन यो जानीते स तेनैव शरीरेण संसारान्मुच्यते मोचयति मुमुक्षुर्भव
ति जपात्तेनैव शरीरेण देवतादर्शनं करोति तस्मादिदमेव मुख्यद्वारं कलौ नान्येषां भवति तस्मादिदं बृहज्जाबालं वि
जानीयान्मुमुक्षुर्भवति। ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् ऊर्ध्वरेतं विरूपाक्षं शंकरं नीललोहितं उमापतिः प
शुपतिः पिनाकी त्यमितद्युतिः ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्यो यजुर्वेदवा
च्यस्तं बृहज्जाबालं जानीयाद्यो जानीते सोमृतत्वं च गच्छति अथ बृहज्जाबालस्य फलं नो ब्रूहि भगवन्निति समासु

ए.न.०
३१

3

ह्योवाचयइमामुपनिषदंनित्यमधीतेसोऽग्निपूतोभवतिसवायुपूतोभवतिसआदित्यपूतोभवतिससोमपूतोभ
वतिससत्यपूतोभवतिसहैलोकपूतोभवतिसलोकपूतोभवतिससर्वपूतोभवति।यइमांहस्ज्ञाबालोपनिषदं
ब्राह्मणोवाक्षत्रियोवा।नित्यमधीतेससर्वंहत्सांतरतिसवीस्हत्सांतरतिससर्वंतरतियएतामुपनिषदंनित्यम
धीतेसोऽग्निंस्तंभयतिसवायुंस्तंभयतिसआदित्यंस्तंभयतिससोमंस्तंभयतिसउदकंस्तंभयतिससर्वान्देवंस्तंभ
यतिससर्वांस्सरुर्वानाकर्षयति।यइमामुपनिषदंनित्यमधीतेसभूर्लोकंजयतिसभुवर्लोकंजयतिससुवर्लोकं
जयतिसमहर्लोकंजयतिसजन्येलोकंजयतिसतपोलोकंजयतिससत्यलोकंजयतिससर्वान्
लोकान्जयतियइमामुपनिषदंनित्यमधीतेसमनुष्यानाकर्षयतिसदेवानाकर्षयतिसनागानानाकर्षयति
सयक्षानाकर्षयतिससर्वानाकर्षयतिसविषंस्तंभयतियइमामुपनिषदंनित्यमधीतेसऋचोधीतेसयजूंष्यधीते
ससामान्यधीतेसोऽथर्वाणमधीतेसोंगिरसमधीतेसशाखाअधीतेसपुराणान्यधीतेसकल्पाअधीतेसगाथाअ

धीतेसनाराशंसीरधीतेससर्वमधीतेससर्वमधीतेअनुपनीतश्शतमेकमेकेनोपनीतेनतत्समंउपनीतश्शतमे
कमेकेनगृहस्थेनतत्समंगृहस्थश्शतमेकमेकेनवानप्रस्थेनतत्प्रस्थेनतत्समंवानप्रस्थश्शतमेकमेकेनयतिनातत्
समंयतीनांशतंपूर्णमेकमेकेनरुद्रजापकेनतत्समंरुद्रजापकश्शतमेकमेकेनाथर्वशिरःशिखाध्यायकेनतत्स
मंअथर्वशिरःशिरःशिखाध्यायकश्शतमेकेनबृहज्जाबालोपनिषदध्यायकेनतत्समंबृहज्जाबालोपनिषदध्याय
कश्शतमेकमेकेनतत्क्रियाचरणेनतत्समंतद्वाएतत्परंधामउपनिषज्ज्ञपशीलस्ययत्रनसूर्यस्तपतियत्रनवा
युर्वातियत्रनचंद्रमाभातियत्रननक्षत्राणिभांतियत्रनाग्निर्दहतियत्रनमृत्युःप्रविशतियत्रनदुःखानिसंति।
सदानंदंपरमानंसदाशिवंब्रह्मादिवंदितंयोगिध्येयंपरमंपदंयत्रागत्वाननिवर्तंतेयोगिनःतदेतदृचाभ्युक्तं।तद्विष्णोः
परमंपदंसदापश्यंतिसूरयःदिवीवचक्षुराततंतद्विप्रासोविपन्यवोजागृवांसःसमिंधतेविष्णोर्यत्परमंपदंॐ
पत्यंॐसत्यंनसपुनरावर्ततेनसपुनरावर्ततेॐसत्यं इतिबृहज्जाबालोपनिषदिपूर्वतापनीयोपनिषत्।

माता॥ अथहैनंभगवन्तंकालाग्निरुद्रंभुसुंडःपप्रच्छकथंरुद्राक्षोत्पत्तिस्तद्धारणात्किंफलमितितंहोवाचभग
वान्कालाग्निरुद्रस्त्रिपुरवधायपुरान्मीलिताक्षोऽहंतेभ्योजलबिन्दवोभूमौपतितास्तेरुद्राक्षाजाताःसर्वानुग्रहार्था
यतेषांनामोच्चारणमात्रेणदशगोप्रदानफलंदर्शनस्पर्शनाभ्यांद्विगुणंत्रिगुणंफलंभवतिअतऊर्ध्वंवक्तुंनश
क्नोतितत्रैतेश्लोकाः कस्माज्जातंतुकिंनामकथंवाधार्यतेनरैः कतिभेदमुखान्यत्रकैर्मन्त्रैःकथयस्वमे दिव्यव
र्षसहस्राणिचक्षुरुन्मीलितंमयापुटाभ्यांतुपतिताजलबिन्दवः तदाश्रुबिन्दवोजातामहारुद्राक्षवृक्षकाःस्था
वरत्वमनुप्राप्यभक्तानुग्रहकारणात् भूम्यान्योभेरात्रौदिवायत्पापंदिवारात्रिकृतंहरेत् लक्षंतुदर्शनात्पुण्यंको
टिस्तुस्पर्शनाद्भवेत् तस्यकोटिशतंपुण्यंलभतेधारणान्नरः लक्षकोटिसहस्राणिलक्षकोटिशतानिच तज्ज
पाल्लभतेपुण्यंनरोरुद्राक्षधारणात् रुद्राक्षाणांतुभद्राणांधारणेस्यान्महत्फलम् धात्रीफलप्रमाणंतुश्रे
ष्ठमेतदुदाहृतम्बदरीफलमात्रंतुमध्यमंप्रोअनेबुधेः॥ अधमंचणकमात्रंस्यात्प्रक्रियैषामयोच्यते ब्राह्म

णाःक्षत्रियावैश्याःशूद्राश्चेतिशिवाज्ञयावृक्षाजाताःपृथिव्यांतुतज्जातीयाःशुभाक्षकाः श्वेतास्तुब्राह्मणाज्ञेयाः
क्षत्रियारक्तवर्णकाःपीतावैश्यास्तुविज्ञेयाःकृष्णाःशूद्राउदाहृताःब्राह्मणोविभृयाच्छ्वेतान्रक्तान्राजातुधारयेत् पी
तान्वैश्यस्तुविभृयात्कृष्णाञ्छूद्रस्तुधारयेत् समास्निग्धादृढास्थूलाकंटकैःसंयुताःशुभाः क्रिमिजग्धंछिन्न
भिन्नंकंटकैर्हीनमेवच व्रणयुक्तमवृत्तंचषड्रुद्राक्षाणिवर्जयेत् स्वयमेवकृतद्वारंरुद्राक्षंस्यादिहोत्तमम् यत्तु
पौरुषयत्नेनकृतंतन्मध्यमंभवेत् समास्निग्धान्दृढान्स्थूलान्क्षौमसूत्रेणसंयुतान् धारयेत्सर्वगात्रेषुसामान्या
तिविचक्षणः निकषेहेमलेखेवयस्यरेखाप्रदृश्यते तदक्षमुत्तमंविद्यात्तद्धार्यंशिवपूजकैःशिखायामेकरुद्राक्षं
त्रिंशतंशिरसावहेत् षट्त्रिंशतंगलेदद्याद्बाह्वोःषोडशधारयेत् मणिबंधेद्वादशचस्कंधेपंचाशतंवहेत् अष्टो
त्तरशतैर्मालामुपवीतंप्रकल्पयेत् द्विसरंत्रिसरंवापिसराणांपंचकंतुवा सराणांसप्तकंवापिविभृयात्कंठदेशतः
मुकुटेकुंडलेचैवकर्णिकाहारकेषुच केयूरकटकेचैवकुक्षिबंधेविशेषतः सुप्तेपीतेसदाकालंरुद्राक्षान्धार

येन्नरः त्रिंशतंत्वधमं पंचाशतं मध्यमत्युच्यते सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत् । शिरसीशानमंत्रेण कं
ठे तत्पुरुषेण च · अघोरेण गले धार्यं तेनैव हृदयेपि च आघोरबीजमंत्रेण करयोर्धारयेत्सुधीः पंचाशदक्षग्र
थितां व्योमव्यापि च चालते पंचब्रह्मभिरंगैश्च त्रिमालां पंच सप्त च अथवा मूलमंत्रेण सर्वाण्यक्षाणि धारये
त् अथ कालाग्निरुद्रं भगवंतं भुसुंडः पप्रच्छ रुद्राक्षाणां मुखभेदेन यदक्षं यत्स्वरूपं यत्फलमिति तत्स्वरूप
मुखयुक्तमरिष्टनिरसनमिष्टफलप्रदं ब्रूहीति होवाच तत्रैते श्लोकाः एकवक्त्रं तु रुद्राक्षं परतत्वस्वरूपकं म्
तद्धारणात्परे तत्वे लीयंते विजितेंद्रियाः द्विवक्त्रं तु मुनिश्रेष्ठ अर्द्धनारीश्वरो भवेत् धारणादर्धनारीशः प्रीयते
तस्य नित्यशः त्रिवक्त्रमनलः साक्षात्स्त्रीहत्यां दहत्सांदहति क्षणात् त्रिमुखं चैव रुद्राक्षमग्नित्रयस्वरूपक
म् तद्धारणाच्च हुतभुक्तस्य तुष्यति नित्यशः चतुर्वक्त्रं स्वयं ब्रह्मा पुरुषहत्यां स पोहति चतुर्मुखं तु रुद्राक्षं पि
तामहस्वरूपकम् पंचवक्त्रं स्वयं रुद्रः कालाग्निर्नामनामतः अगम्यागमनं चैव अभक्ष्यस्य च भक्षकः

र.द्र.जा० मुच्यते सर्वपापेभ्यः पंचवक्त्रस्य धारणात् पंचवक्त्रं तु रुद्राक्षं पंचब्रह्मस्वरूपकम् तस्य धारणमात्रेण संतुष्य

३४ तिसदाशिवः षड्वक्त्रमपि रुद्राक्षं कार्तिकेयाधिदैवतम् विनायकाधिदैवं च प्रवदंतिमनीषिणः तद्धारणाद्बुका

34 मादिषड्वर्गविजयी भवेत् सप्तवक्त्रं तु रुद्राक्षं सप्तमात्राधिदैवतम् सप्ताश्वदैवतं चैव मुनि सप्तक दैवतम् तद्धा

रणान्महाश्रीस्यान्महदारोग्यमुत्तमम् महतीज्ञानसंपत्तिः शुचिर्धारयतः शनैः अष्टवक्त्रं तु रुद्राक्षं अष्टमूर्त्यधि

दैवतम् वस्वष्टकप्रियं चैव गंगाप्रीतिकरं परम् तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः नववक्त्रं तु रुद्राक्षं नवश

क्त्यधिदैवतम् तस्य धारणमात्रेण प्रीणंते नवशक्तयः दशवक्त्रं तु रुद्राक्षं यमदैवमुदाहृतम् दशाशाप्रीतिजन

रा म ३४ कं धारणेनात्र संशयः तदाहुः प्रीतिजननं धारणेनाप्रतिष्ठितम् एकादशमुखं लक्ष्मं रुद्रैकादशदैवतम् तमि

द्रदैवतं चाहुः सदा सौभाग्यवर्द्धनम् ॥ रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम् द्वादशादित्यदेवं च विभर्त्यत्य

परो नरः त्रयोदशमुखं चाक्षं कामदं सिद्धिदं शुभम् तस्य धारणमात्रेण कामदेवः प्रसीदति चतुर्दशमुखं चाक्षं रु

द्रनेत्रसमुद्भवम् सर्वव्याधिहरं चैव सदारोग्यमवाप्नुयात् मद्यं मांसं च लशुनं पलाण्डुं शिग्रुमेव च श्लेष्मातकं
ड्वराहभक्ष्यं वर्जयेन्नरः ग्रहणे विषुवे चैव अयने संक्रमे तथा दर्शे च पूर्णमासे च पुण्येषु दिवसेषु च रुद्राक्षधा
रणात्सद्यः सर्वपापक्षयो भवेत् रुद्राक्षमूलं तद्ब्रह्म तन्नालं तद्विष्णुरुच्यते तन्मुखं रुद्र इत्याहुस्तद्बिन्दुः सर्वदेवताः
य इमामुपनिषदं बालो वा युवा वा वेद स महान्भवति स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवति एतयेव होमं कु
र्यादेतयेवार्चनं तदेतद्राक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कंठे बाह्वोः शिखायां वा बध्नीत सप्तद्वीपवती भूमिर्दक्षि
णार्थं नावकल्पते तस्माच्छ्रद्धया यां कांचिद्गां दद्यात्सा दक्षिणा भवति य इमामुपनिषदं ब्राह्मणो वा क्षत्रियो वा सकृ
दधीयानो दिवसकृतं पापं नाशयति प्रातरधीयानो मासकृतं पापं नाशयति मध्याह्नेऽधीयानः षण्मासकृतं
पापं नाशयति सायमधीयानः संवत्सरकृतं पापं नाशयति सायंप्रातरधीयानो जन्मकृतं पापं नाशयति य इ
मामुपनिषदं ब्राह्मणो वा क्षत्रियो वाधीते षष्टिशतसहस्रलक्षगायत्रीजपफलानि भवंति ब्रह्महत्यायाः पूतो भ

वतिसुरापानात्पूतो भवति सुवर्णस्तेयात्पूतो भवति अभोज्यभोजनात्पूतो भवति अभक्ष्यभक्षणात्पूतो भव
ति अगम्यागमनात्पूतो॰ गुरुतल्पगमनात्पू॰ पतितसंभाषणात्पू॰ तत्संयोगा॰ सर्वेषु तीर्थेषु स्नातो भवति
मंत्रिः शतसहस्रपावनो भवति शिवसायुज्यमिति न स पुनरावर्तते न स पुनरावर्तते इत्यों सत्यमों सत्यम् इति स
प्तमं ब्राह्मणं अथ कालाग्निरुद्रं भगवंतं सनत्कुमारः पप्रच्छ अधीहि भगवन्रुद्राक्षधारणविधिं ब्रूहीति स होवा
च तस्मिन्समये निदाघजडभरतदत्तात्रेयकात्यायनभरद्वाजकपिलवासिष्ठ॰ अथ काकालाग्निरुद्रः किमर्थं भग
वतामागमनमिति होवाच रुद्राक्षधारणविधिं वै सर्वे पिप्पलादादयश्च कालाग्निरुद्रं प्रतिसमेतो सर्वे श्रोतुमिच्छामह
ति अथ कालाग्निरुद्रः प्रोवाच रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायंते अथ सदाशिवः संहारकाले संहारं कृ
त्वा संहाराक्षं मुकुलीकरोति तन्नयनाज्जाता रुद्राक्षा इति होवाच तस्माद्रुद्राक्षत्वमिति अथ कालाग्निरुद्रः प्रो॰
वाच यस्तद्रुद्राक्षं वाग्भिः पर्यंकरोति दृशगोप्रदाने न यत्फलम् आप्नोति तत्फलमश्नुते स एष भस्मज्योती रुद्राक्ष इति

होवाच एष सर्वेश्वरः शतरुद्राक्षं करेण स्पृष्टुमिच्छन् शत गोप्रदानफलं लभते तद्रुद्राक्षं धारणं कर्तुमिच्छन् द्विशत
गोप्रदानफलं लभते तद्रुद्राक्षस्य यज्ञोपवीतवत् धारणमात्रेण सहस्रगोप्रदानफलं लभते तद्रुद्राक्षे करयोर्धा
र्यमाणयोर्द्विसहस्रगोप्रदानफलं भवति तत् रुद्राक्षे कंठे धार्यमाणे त्रिसहस्रगोप्रदानफलं भवति तद्रुद्राक्षे कर्णयोर्धा
र्यमाणे एकादशसहस्रगोप्रदानफलं भवति एकादशरुद्रत्वं च गच्छति तद्रुद्राक्षे शिरसि धार्यमाणे कोटिगोप्रदान
फलं भवति एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यं तद् इति होवाच अथ भगवंतं कालाग्निरुद्रं सनत्कुमारः पप्रच्छ
रुद्राक्षप्रदानात्फलमस्त्येवेति होवाच अथ कालाग्निरुद्रः प्रोवाच अष्टशत रुद्राक्षं दत्वा अष्टशत रुद्राक्षो न्याधा
रयेत् भूवलयप्रदानेन यत्फलमाप्नोति तत्फलमश्नुते स एष भस्मज्योती रुद्राक्ष इति होवाचाथ कालाग्निरुद्रं भगवं
तं सनत्कुमारः पप्रच्छ रुद्राक्षसहस्रं क्रमेण धर्तुं शक्यं वा इति स यकालाग्निरुद्रः प्रोवाच रुद्राक्षधारणं कर्तुमधिवा
सनादि प्राणप्रतिष्ठां कृत्वा रुद्राक्षसहस्रं वर्षमेकं तु धारयेद्ब्रह्मत्वं गच्छति द्विसहस्ररुद्राक्षं द्वे वर्षे धारयेद् विष्णुत्वं गच्छ

रु॰जा॰
३६
36

तित्रिसहस्रंरुद्राक्षंत्रीणिवर्षाणिधारयेत्सदाशिवत्वंगच्छतिनसपुनरावर्ततेसएषभस्मज्योतीरुद्राक्षइतिहोवा॰
चाथकालाग्निरुद्रंभगवंतंसनत्कुमारःपप्रच्छसर्वोपनिषत्सुक्तधारणफलंब्रूहीत्यथकालाग्निरुद्रःप्रोवाचसर्वोप॰
निषत्सारंब्रवीम्यवधारयेति तत्रैतेश्लोकाभवंतिविविक्तदेशेचसुखासनस्थःशुचिःसमग्रीवशिरःशरीरः अत्या
श्रमस्थःसकलेंद्रियाणिनिरुध्यभक्त्यास्वगुरुंप्रणम्य हृत्पुंडरीकंविरजंविशुद्धंविचिंत्यमध्येविशदंविशोक
म् अचिंत्यमव्यक्तमनंतरूपंशिवंप्रशांतममृतंब्रह्मयोनिम् तथादिमध्यांतविहीनमेकंविभुंचिदानंदमरूपमद्भु
तम् उमासहायंपरमेश्वरंप्रभुंत्रिलोचनंनीलकंठंप्रशांतम् ध्यात्वामुनिर्गच्छतिब्रह्मयोनिंसमस्तमाक्षिंतमसः
परस्तात् सब्रह्मासशिवःसेंद्रःसोक्षरःपरमःस्वराट् सएवविष्णुःसप्राणःसकालोग्निःसचंद्रमाःसएवसर्वंयद्भूतंयच्च
भव्यंसनातनम् ज्ञात्वातंमृत्युमत्येतिनान्यःपंथाविमुक्तयेएवंध्यात्वारुद्राक्षान्धारयेत् इत्यष्टमंब्राह्मणं अथजन
कोवैदेहोयाज्ञवल्क्यमुपसमेत्योवाचभगवन्त्रिपुंड्रविधिमनुब्रूहीतिसहोवाचयाज्ञवल्क्यःप्रमाणमस्यत्रिधाआ

रु॰जा॰
३६

ललाटादाचक्षुपक्ष्माभ्रुवोर्मध्यतः जनको ह वैदेहः स होवाच भगवन्यद्यत्त्वं तदाग्नेयं भस्म सद्योजातादिपंचब्रह्म
मंत्रैः परिगृह्याग्निरिति भस्मेत्यभिमंत्र्यमानस्तोकइतिमन्त्रेण ललाटवक्षःस्कंधेषु धारयित्वा पूतो भवति मो
क्षी भवति शतरुद्रियजपेयत्फलमवाप्नोति स एष भस्मज्योतिः स एष भस्मज्योतिरिति वै याज्ञवल्क्यः जनको ह
वैदेहः स होवाच याज्ञवल्क्यं किंतेफलमिति स होवाच देव मुक्तिर्भवति तद्भस्मधारणादेव शिवसायुज्यमवाप्नोति न
स पुनरावर्तते स एष भस्मज्योतिरिति वै याज्ञवल्क्यः जनको ह वैदेहः स होवाच याज्ञवल्क्यं भगवानिति तद्भ
स्मधारणादेव किंफलमभूत् इति न वेति तत्र परमहंससंवर्तकारुणिः श्वेतकेतुदूर्वासऋभुनिदाघजडभरतदत्ता
त्रेयरैवतकभुसंडप्रभृतयो विभूतिधारणादेव मुक्ताः स्युः स एष भस्मज्योतिः स एष भस्मज्योतिरिति वै याज्ञव
ल्क्यः जनको ह वैदेहः स होवाच याज्ञवल्क्यं भस्मस्नानेन किं जायत इति यस्य कस्यचिच्छरीरे यावंतो रोमकूपा
स्तावंति लिंगानि भूत्वा तिष्ठंत इति ब्राह्मणो वा क्षत्रियो वा वैश्यो वा शूद्रो वा तद्धारणादेव तच्छं हस्य रूपं यस्यांत

बृ०जा०
३७
37

स्यांल्लेवावतिष्ठते अथजकोवैदेहःपैप्पलादेनसप्रजापतिलोकंजगामतंगत्वोवाचभोप्रजापतेत्रिपुंड्रस्यविधिं
ब्रूहीतिहोवाचतंप्रजापतिरब्रवीद्यथैवेश्वरस्यमाहात्म्यंतथैवत्रिपुंड्रस्यमाहात्म्यमितिहोवाचप्रजापतिःअथपैप्प
लादोवैकुंठंजगामतंगत्वोवाचलोवाचभोविष्णोत्रिपुंड्रस्यविधानंब्रूहीतिसोवाचयथैवेश्वरस्यमाहात्म्यंतथैवत्रिपुं
ड्रस्यमाहात्म्यमितिहोवाचविष्णुः अथपैप्पलादोभगवंतंकालाग्निरुद्रंपरिसमेत्योवाचअधीहिभगवन्त्रिपुंड्रस्यवि
धिंब्रूहीतिअथकालाग्निरुद्रःत्रिपुंड्रस्यविधानमनुब्रवीमीतिहोवाच ततोत्राभुदूर्वासनिदाघजडभरतात्रेयरैवतक
प्रभृतयोपिभुसुंडंपरिसमेत्योचुःरैवतकोमवांह्यमुनिर्भुसुंडमब्रवीत् त्रिपुंड्रविधिमनुब्रूहीतिभुसुंडःसहोवाच।
त्रिपुंड्रविधिर्मयावक्तुंनशक्यःसत्यमितिवाचानंतरंतानृषीन्नमस्कृत्यतानृषीन्वंदतिसत्समक्षंसर्वेशापयइति
अथभगवंतंकालाग्निरुद्रंश्वेतकेतुश्चजाबालःपरिसमेत्योवाचहरिश्चंद्रश्चप्रजापतिश्चकालाग्निरुद्रंपरिसमेत्यो
वाचाथदेवाश्चशापयश्चैतेपरस्परानुवादंकृत्वोन्मीलयित्वाकालाग्निरुद्रंपृच्छामइति अथकालाग्निरुद्रंत्रिपुंड्र

बृ०जा
३७

स्यविधानंब्रूहीतिहोवाचदेवाश्चशापयश्चत्रिपुण्ड्रस्यमाहात्म्यंशृणुध्वमितिअथभस्मच्छन्नः संसारान्मुच्यते भस्म
शय्याशय्याशयानसंशयाद्गोचरस्यशिवस्यासुज्यमितितिनसपुनरावर्त्तते रुद्राध्यायीसन्नमृतत्वंगच्छतिस।
एषभस्मज्योतिर्विभूतिधारणाद्ब्रह्मलोकत्वंगच्छति सएषभस्मज्योतिः सएषभस्मज्योतिर्विभूतिधारणात्कैवल्यम
श्नुते सएषभस्मज्योतिर्विभूतिधारणादेवतीर्थेषुमृतेत्वंगच्छति सएषभस्मज्योतिः सएषभस्मज्योतिर्विभूति
धारणादेवसर्वतीर्थेषुस्नातोभवति विभूतिधारणात्त्रिस्थलैश्यत्फलमवाप्नोतितत्फलमश्नुते सएषभस्मज्योतिः
सएषभस्मज्योतिः सएषो भस्मज्योतिर्यस्यकस्यचिच्छरीरेत्रिपुंड्रस्यलक्ष्यंवर्त्ततेप्रथमाप्रजापतिर्द्वितीयाविष्णुस्तृ
तीयासदाशिवइतिसएषभस्मज्योतिः इतिनवमंब्राह्मणम् अथजाबालोभुसुंडिः कैलासशिखरवासमों
काररूपिमहादेवमुमादेहार्धधारिणंहरिविरिञ्चिपुरंदरसुरसेवितंस्तूयमानमनंतैरपिवेदैर्मूर्तिधरैः सोमार्धकृत
शेखरंसोमसूर्याग्निनयनमनंतेंदुरविप्रभंव्याघ्रचर्मपरीधानंमृगहस्तंभस्मोद्धूलितविग्रहंतिर्यक्त्रिपुंड्ररेखाविराज

मानमालंनं।स्मिनपूर्णपंचविधपंचाननंवीरासनारूढममेयममनाद्यंतनिष्कलंनिर्गुणंशांतंनिरंजनमनामयंकुंदपद्म
पूर्वंशिवनामानिसमुच्चरंतंदुर्निरीक्ष्यंहिरण्यबाहुंहिरण्यरूपंहिरण्यवर्णंहिरण्यनिधिमद्वैतंचतुर्थमेकमाशास्यंभगवं
तंप्रणवंशिवंप्रणम्यमुहुर्मुहुरभ्यर्च्यश्रीफलदलैः सितेनभस्मनास्नातोत्तमांगः कृतांजलिपुटःपप्रच्छ अधीहिभ
गवन्वेदसारमुद्धृत्यात्रिपुंड्रविधिंयस्मादन्यानपेक्षमेवमोक्षोपलब्धिः किमस्मनोद्रव्यंकतिस्थानानिर्मनवाप्यस्यके
नाकदावातस्यधारणंकेवात्राधिकारिणोनियमास्तेषांकेवामामंनेवासिनमनुशासयमोक्षं इतिप्रथमःखंडः
अथोवाचभगवान्सदाशिवः परमकारुणिकःसमथान्सुरानपिसंवीक्ष्यपूर्तंआगुरुस्याद्धोमयंब्रह्मपर्णेनिधायत्र्यंबक
मितिमंत्रेणशोधयेच्चततः येनकेनापितेजसाथतत्स्वगृह्योक्तमार्गेणप्रतिष्ठाप्यहुताशनंततस्तद्धोमयद्रव्यंनिधा
यसोमायस्वाहेतिमंत्रेणततस्तिलव्रीहिभिःसाज्यैर्जुहुयाद्धुतेष्टोत्तरसहस्रंसार्द्धमेतद्धातत्राज्यस्यपर्णमयीजुहूर्भ
वतितेनेननपापंशृणोतितद्धोमेमंत्रस्त्र्यंबकमित्येवांतोस्विष्टकृत्पूर्णाहुतीस्तेनैवाष्टदिक्षुबलिप्रदानं ततस्तद्भस्मगा

यत्र्यासंप्रोक्ष्यतत्तस्तद्भस्मेराजतेताम्रेमृन्मयेवापात्रेनिधायरुद्रमंत्रैःपुनरभ्युक्ष्यशुद्धेदेशेसंस्थापयेत् ततोभोज
येद्ब्राह्मणान् ततःस्वयंस्नातोमानस्तोकइतिसद्योजातमित्यादिपंचब्रह्ममंत्रैर्भस्मसंगृह्य।अग्निरितिभस्म जल
मितिभस्म।स्थलमितिभस्म।वायुरितिभस्म।व्योमेतिभस्म शापयोभस्म।वेदाभस्म।देवाभस्म।सर्वं ह वा इदंभ
स्म।पूतमवनमामिसद्यः समस्ताघनाशकमितिशिरसाभिमन्त्र्यपूतेवामदेवायेतिसंस्थाप्यत्र्यंबकमि
तिसंप्रोक्ष्यशुद्धेनेतिसंमर्द्यसंशोध्यनेनैवापादमस्तकमुद्धूलनमाचरेत् तत्रपंचब्रह्ममंत्राः ततःशेषस्य भस्मनो
विनियोगः।तर्जनीमध्यमानामिकाभिरग्रेभस्मासीतिसंगृह्यमूर्द्धानमितिमूर्धस्यग्रेन्यसेत्।त्र्यंबकमितिललाटेनी
लग्रीवायेतिकंठेकंठस्यदक्षिणपार्श्वेत्र्यायुषमितिवामेपिकपोलयोःकालायेतिनेत्रयोःत्रिलोचनायेतिश्रोत्र
योःशृणुयामेतिआत्मात्हृदयइतिहृदयेनाभौनाभानाभिन्वइतिमंत्रेणदक्षिणभुजमूलेभवायेतितन्मध्येरुद्रा
येतितन्मणिबंधेभवायेतितत्करपृष्ठेपशुपतयेनमइतियामबाहुमूलेउग्रायेतितन्मध्येअग्रेवधायेतितन्म

बृ०जा०
३९
39

णिवंधेद्दिरेवधारयेत्तिलकंरपृष्ठेनमोहंत्रेत्यंसेश्रीकरायेतियथाक्रमंभस्मधृत्वासोमायेतिशिवंनत्वाततःप्रक्षाल्यक
रौतद्भस्मजलमापःपुनंतितिपिबेत्संत्याज्यंएवंप्रातर्मध्याह्नेसायंतनेपिकालेविधिवद्भस्मधारणमप्रमादेना
कार्यंप्रमादात्पतितो भवेत्।ब्राह्मणानामयमेवधर्मोयमेवधर्मोयमेवधर्मः एवंभस्मधारणमहत्वानाश्नीयाद्यो
ऽमन्यद्वान्यदपिप्रमादात्सकृद्भस्मधारणंनगायत्रींजपेन्नजुहुयाद्ग्नौनतर्पयेद्देवान्ऋषीन्पितॄन्नयमेवधर्म
ःसनातनःसर्वपापघ्नणाशकोमोक्षहेतुर्नित्योयंधर्मोब्राह्मणानांब्रह्मचारीगृहीवानप्रस्थयतीनामेतदकरणे
प्रत्यवैतिब्राह्मणःअकृत्वाप्रमादेनैकदैतदष्टोत्तरसहस्रंगायत्रीजलमध्येजपित्वोपोषणेनैकेनशुद्धोभवति य
तिस्त्वेकदाभस्मधारणमुपोष्यद्वादशसहस्रंप्रणवंजप्त्वाशुद्धोभवति अन्यथावायसमालाद्दकमुखेपरेतःप
तितोभवति भस्मनोस्ययद्यभावस्तदानयेभस्मदानयेभस्मदावानलस्यान्यद्वावश्यंमंत्रपूतंधार्यमेमत्वाततःप्रयुंजा
नोरात्रिकृतात्पापात्प्रमुच्यतेमध्यंदिनेमाध्याह्निकींसंध्यांकृत्वोपस्थायनांतमादित्याभिमुखोधीयानःसुरापानात्पूतो

बृ०जा
३९

भूवतिसुवर्णस्तेयात्पूतोभवतिगुरुदाराभिगमनात्पूतोभवति ब्रह्मवधात्पूतोभवति गोवधात्पूतोभवति स्त्रीव
धात्पूतोभवतिअश्ववधात्पूतोभवतिगुरुवधात्पूतोभवतिमातृपितृवधात्पूतोभवतित्रिकालेमेतत्प्रयुंजानःस
र्ववेदपारायणपुण्यमाप्नोतिसर्वतीर्थफलमश्नुतेअनुपद्भुतः सर्वमायुरेतिविंदतेप्राजापत्यंरायस्पोषंगोपत्यमेव
मावर्तयेदुपनिषदमेवमावर्तयेदित्याहभगवान्सांबसदाशिवःसांबसदाशिवः इतिद्वितीयःखंडः अथभुसुंडोजा
बालोमहादेवंसांबंप्रणम्यपुनःपप्रच्छकिंनित्यंब्राह्मणानांकर्मकर्तव्यंपदकरणेप्रत्यवेतिब्राह्मणः कःपूजनीयः
कोवाध्येयः कःस्मर्तव्यः कथंध्येयःक्वस्थातव्यमेतद्ब्रूहिसमासेनतंहोवाचप्रागुदयान्निर्वर्त्यशौचादिकंततःस्नाया
न्मार्जनंरुद्रसूक्तेःस्नानवस्त्रादन्तंवासःपरिधनेपाप्मनोपहत्यैऊर्ध्वंतमादित्यमभिध्यायन्नुद्धूलितांगःकृत्वायथास्नानेभ
स्मस्नानेत्रिपुंड्रंधृतेनैवरुद्राक्षान्धृतान्येतत्रसेवांसमशीस्तुतथाचान्येमूर्ध्निचत्वारिंशच्छिरवायामेकंतत्रयंवाश्रोत्र
योर्द्वादशकंठेद्वात्रिंशद्बाह्वोःषोडशषोडशद्वादशद्वादशमणिबंधयोःषट्षड्गुष्ठयोस्ततःसंध्याकुर्यादहरहःसंध्यां

कुर्याद्दहरहः संध्यामुपासीत। अग्निर्ज्योतिरित्यादित्यादिभिरग्नौ जुहुयाच्छिवलिंगत्रिसंध्यमभ्यर्चकुशोघासीनो ध्या
त्वा सांबं मामेव हृत्पद्मारूढं हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णपमुपाश्य विमोचकं पुरुषं कृष्णपिंगलं ऊर्ध्वरेतं संविरू
पाक्षं विश्वतः सहस्राक्षं सहस्रचरणं विश्वतोबाहुं विश्वात्मानं एकमद्वैतं निष्कलं निर्गुणं शांतं शिवमक्षरमव्ययं हरिहिर
ण्यगर्भादिस्रष्टारं अप्रमेयमनाद्यंतं रुद्रसूक्तैरभिषिच्य सितेन भस्मना विल्वदलैस्त्रिशाखैरार्द्रैरनार्द्रैर्वा नतत्र संम
र्शस्ततः पूजासाधनं कल्पयेच्च नैवेद्यं ततश्चैकादशगुणो रुद्रो जपनीय एकगुणो वा ततः षडक्षरो वा मंत्रो जपनीयः
ॐ मित्यग्रे व्याहरेन्नमइति पश्चात्ततः शिवायेत्यक्षरत्रयं ओमित्यग्रे व्याहरेन्नमइति पश्चात्ततो महादेवायेति पंचाक्षरा
णि ततस्तारकः परमो मंत्रस्तारकोऽयं पंचाक्षरकोऽयं शैवो मनुस्तारको मनुः शैवस्तारकः अयमेवोपदिश्यते मनुरविमु
क्तेशैवेभ्यः सन्तजीवेभ्य अयमेव मंत्रस्तारयति स एव ब्रह्मोपदेशः ब्रह्मा सोमो हं पवनः सोमोहं पवनस्सोमोहं पवतेति
सोमोऽहं जनिता मतीनां सोमोऽहं जनिता दिवः सोमोहं जनिता पृथिव्याः सोमोहं जनिताग्नेः सोमोहं जनितासूर्यस्य

सोमोहंजनितेंद्रस्यसोमोहंजनितोतविष्णोः सोमोहमेवजनितामनश्चंद्रमसोर्वेदानां भूर्भुवः सुवरादीनांसर्वे
षांलोकानांचविश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् तत्सर्वस्यसोमोहमेवजनिताविश्वाधिकोरुद्रो
महर्षिःहिरण्यगर्भादीनहंजायमानान्पश्याम्यिमोरुद्रोअग्नौयोअप्सु यओषधीषुयोरुद्रोविश्वाभुवनाविवेशस।
वाहमात्मांतरात्मब्रह्मज्योतिर्यस्मान्नमनोन्यः परोहमेवपरोविश्वाधिकोमामेवंविदित्वामृतत्वमेतितरतिशोकं
मामेवंविदित्वासांस्मृतिकंरुजमहंद्रावयामितस्मादहंरुद्रोयोहंसर्वेषांपरमागतिःसोहंसर्वकः यतोवाइमानि
भूतानिजायंते। येनजातानिजीवंति। यत्प्रयंत्यभिसंविशंति। तंमामेवंविदित्वोपासीतभूतेभिर्देवरैभिष्टुतोहमे
वभीषास्माद्वातःपवतेभीषोदेतिसूर्यः भीष्मास्मादग्निश्चेंद्रः सोनान्यमृतएवयोहंसर्वेषामधिष्ठातासर्वेषांभूता
नांचपालकः सोहंपृथिवीसोहमापः सोहंतेजः सोहंवायुः सोहमाकाशः सोहंकालः सोहंदिशः सोहमात्मानमपिस
र्वंप्रतिष्ठितम् ब्रह्मविदाप्नोतिपरंब्रह्मास्यशिवोमेअस्तुसदाशिवां अचक्षुर्विश्वचक्षुरकर्णोविश्वतःकर्णोपादोविश्व

बृ॰जा॰
५९
५१

विश्वतः कर्णो पादो विश्वतः पादो पाणिर्विश्वतः पाणिरश्शिरा विश्वतः शिरा विद्यामात्रैकसंश्रयो विद्यारूपो विद्यामयो
विश्वेश्वरोहमजरोहं मामेवं विदित्वा प्राप्नुवन्ति संसृतिपाशगा लभ्यं तेन तस्मादहं पशुपाशविमोचकः पञ्चावस्थामानवं
ब्रह्मांडमध्यवर्जितं स्वयुक्तात्मानो यतं मामेव प्राप्नुं प्राप्यान्ते मां न पुनरावर्तन्ते न पुनरावर्तन्ते। त्रिशूलनिलयां काशः
मधिश्रित्य त्यक्तासर्वो मय्येवानुप्रविश्यंति प्रज्वालदृक्षिगं हविर्यथा नयजमानमासीदन्ति तथा स्थूलं स्थूलकाकुणपं नतनता
दृशं वपुराप्नुवन्ति एषएवादेशः एषउपदेशः एषएव परमो धर्मः सत्यानत्र नप्रमादितव्यं नतत्रोद्धूलनत्रिपुंड्राभ्यांत
था रुद्राक्षधारणेन तथा मदर्चनाद्व प्रमादितापिनां तद्देवसदने निरीक्षकुर्यात्। अतोत्र प्रमादितव्यं नेद्विजपस्तद्विनपः
काश्यामेव मुक्तिकामानामासनं नत्याज्यं मोचकोहमविमुक्ते निवसं नानाविमुक्तात्परं स्थानं २ काश्यां स्थानानि
चत्वारि तेषु मध्ये हिंतं तत्र प्राच्यामैश्वर्यस्थानं दक्षिणायां विलासस्थानं पश्चिमायां ज्ञानस्थानमुत्तरायां वैराग्यस्थानं त
स्मिन्स्वदं तोनिर्लिप्तमव्ययमनाद्यन्तवेद्यमनिर्देश्यमनिरुक्तमप्रधृष्यमाशास्यमद्वैतं सर्वाधारमनिरीक्ष्यमहरहर्ब्र

ह्मविष्णुपुरंदराद्यमरसेवितं मामेवद्योतिःस्वरूपंलिंगंतदेवोपासितव्यंनैवभासयंतितल्लिंगंभानुश्चंद्रोग्निर्वामल
काशंविश्वेश्वराभिधमापातालमधितिष्ठतितदेवाहंतत्रार्चितोहंसाक्षान्त्रिशाखैर्बिल्वदलैःपत्रैर्वायोभिषिच्यसं
पूजयेन्मन्मनामव्याहितासुर्मय्येवार्पिताखिलकर्माभस्मादिग्धांगोरुद्राक्षभूषणोमामेवप्रपन्नोमदेकपूजानि
रतःसंपूजयेत्तदहमस्मात्मितंमोचयामिपाशजालसंसृतिरूपात्।अहरहरभ्यर्च्यविश्वेश्वरंलिंगंतत्ररुद्रसूक्तैर
भिषिच्यतद्देवस्नापनंपयस्त्रिःपीत्वामहापातकेभ्योविमुच्यतेनशोकमाप्नोतिमुच्यतेसंसारबंधनात्।तदनभ्य
र्च्यनाश्नीयात्फलमन्नमन्यद्वायद्यश्नीयाद्रेतोभक्षीभवेत्सापः पिबेद्यदित्रिवत्सूयपोभवेत्प्रमादेनैकदाननभ्य
र्च्यमांभुक्त्वाभोजयित्वावाकेशांश्चापयित्वागव्यानिपंचसंगृह्योपोष्यजलेरुद्रस्यानेजपेत्त्रिवारंरुद्रानुवाकमादित्यं
चस्यचाभिधायस्वकृतंकर्मततोरौद्रैरेवमंत्रैःकुर्यान्मार्जनंततोभोजयित्वाब्राह्मणान्पूतोभवति अन्यथापरेता
यातनामश्नुते पत्रैर्जलैःफलैर्वान्यैर्वाभिपूज्यविश्वेश्वरंमांततोश्नीयात्।कापिलेनपयसारुद्रसूक्तैरभिषिच्य

मामेव शिवलिंगरूपिणं ब्रह्महत्यात्पूतो भवति। कापिलेनाज्येनाभिषिच्य सुरापानात्पूतो भवति कापिलेन दध्नाभिषिच्य सु
रापानात्पूतो भवति। कापिलेन दुग्धाभिषिच्य सर्वान् वाप्नोति कामानि दुग्धैः स्वर्णस्तेयात्पूतो भवति मधुनाभिषिच्य गुरुदा
राभिगमनात्पूतो भवति। सितयाभिषिच्य सर्वजीववधात्पूतो भवति क्षीरादिभिरेतैरभिषिच्य सर्वान् वाप्नोति कामानि
दमकिकं महाप्रस्थशानमहापस्थशानमाने: शातैरभिषिच्य मुक्तो भवति संसारबंधनात्। मामेव लिंगरूपिणं माघ्यां पौर्ण
मास्याममावास्यायां वा स्यार्यं वा महापातेष्टमूरणे संक्रांतौ वाभिषिच्य तिलैः सतंडुलैः सपूज्य नवैर्बिल्वदलैरभ्यर्च्य का
पिलेनाज्येन्वितगंधसारधूपैः परिकल्प्य दीपांश्च तैनैवाज्येन सीन साज्यमुपहारं कल्पयित्वा पुनर्धूपदीपांश्च कल्प
यित्वा दद्यात्पुष्पांजलिमेवं प्रयतनोभ्यर्च्य मम सायुज्यमेति मम सायुज्यमेति। शाजै महाप्रस्थानि खंडै सतंडुलैरभिपू
ज्य चंद्रलोककामश्चंद्रलोकमवाप्नोति। तिलैरेतावद्भिरभिपूज्य वायुलोककामो वायुलोकमवाप्नोति। माषैरेता
वद्भिरभिपूज्य वरुणलोककामो वरुणलोकमवाप्नोति। यवैरेतावद्भिरभिपूज्य सूर्यलोककामः सूर्यलोकमवा

प्नोति एतैः सर्वैरेवाभिपूज्य स्वर्गलोककामः स्वर्गलोकमवाप्नोति एतैरेनावद्भिर्द्विगुणैरभ्यर्च्य ब्रह्मलोकमवाप्नोति।
एतैरेनावद्भिरेव चतुर्गुणैरभिपूज्य विष्णुलोकमवाप्नोति। एतैरेनावद्भिरेवाष्टगुणैरभिपूज्य चतुर्जोलं ब्रह्मकोशं यं मृत्यु
र्नावपश्यति तमतीत्य मा(ल्लो)ककामो मल्लोकमवाप्नोति नान्यन्मल्लोकात्परं काम्यं यमवाप्य न शोचति। न स पुनरा
वर्तते न स पुनरावर्तते। लिंगरूपिणं मामेवं संपूज्य विंदंति सिद्धा योगिनश्चिंतयंति मां यजंति यज्विनः मामेव स्तुवंति
वेदाः सांगाः सोपनिषद्काः सेतिहासाः। न मत्तोन्यदहमेव सर्वं मयि सर्वं प्रतिष्ठितं ततः काश्यां प्रयत्नेनाहमेवाभिपूज्यस्तत्र
गणा रौद्रा नानामुखा नानाशस्त्रधारिणो नानारूपधरा नानाचिह्निताः सर्वे भस्मदिग्धा गात्र(रु)द्राक्षाभरणाः कृता
ञ्जलयो नित्यमभिध्यायंतः सन्ति। तत्र पूर्वस्यां दिशि ब्रह्मा कृतांजलिरनिशमुपास्ते। दक्षिणदिशि विष्णुरद्धार्नेशंकृलैवमू
र्धन्यंजलिमामुपास्ते प्रतीच्यामिंद्रो सज्जनं गउपास्तेउदीच्यामग्निमुखारक्तांगा रक्तकाया हेमांगा हेमवस्त्राः समुपास
ते मामेव वेदाश्चतुर्मूर्तिधरा दक्षिणायां दिशि मुक्तिस्थानं तन्मुक्तिमंडपसंज्ञितं तत्रैनेकगणाः पालकाः सायुधाः पापघ्ना

बृं०जा०
४३

मुक्ताः तत्रऋषयः शांभवाः पाशुपतामहाराजिजितेंद्रियामाम द्वैतं च तथैकमाश्रित्य मुपास्यं शिवं सांबं संसारमोचकं
ध्यात्वा वसंति रुद्रपरायणाः वेदावतंसं शैवं पंचाक्षरं जपंतस्तारकं सप्रणवं मोदमानास्तिष्ठंति। तत्रैकारत्न वेदिकांतस्था
हमासीनः काश्यांत्यक्तकुणपांश्चैवानानीयां केस्वस्यैवसंवेश्य भासितरुद्राक्षभूषितानुपस्थश्रयमाभूदेतेषां जन्ममृत्यु
चेति तारकं शैवं मनुमुपदिशामि। ततस्तेमुक्ता मामनुविशंति विज्ञानमयेसांबे नपुनरावर्तंतेइह तारोप्रविष्टं हविरिवतत्रैव वसु
त्यर्थमुपदिश्यते शैवो मंत्रैः सचाक्षरः तन्मुक्तिस्थानं तदोंकाररूपं ततो मदर्पितकर्मणां मदाविष्टचेतसां मद्रूपता भवंतितना
न्येषामियं ब्रह्मविद्येयं॥ मुमुक्षवः काश्यामेवासीनावीर्यवंतो विद्यावंतो विज्ञानघनं ब्रह्मकाशं चतुर्जालं यं मृत्युर्नाव
पश्यति। यं ब्रह्मा नावपश्यति यं विष्णुर्नावपश्यति यमिंद्राग्नी नावपश्यतः वरुणाद्यो नावपश्यंति तमेव तेज्ञः स्पुष्टं विश्वं
भवं हे मा मां संश्लिष्य वसंतं चंद्रकोटिसमप्रभं चंद्रकिरीटं सोमसूर्याग्निनयनं विभूतिभूषितविग्रहं शिवं मामेवमभिध्या
यंतो मुक्तिकांक्षिणा मुक्तबंधा मय्येव लीना भवंति ये वान्ये काश्यां पुरीषकारिणः प्रतिग्रहरतास्त्यक्तपापस्मधारणास्त्य

कः रुद्राक्षधारणात्स्यक्तः सोमवारव्रतात्स्यक्तः विश्वेश्वरार्चनात्स्यक्तः अंतर्गृहयात्रात्स्यक्तः पंचाक्षरजपात्स्यक्तः रुद्र
जपात्स्यक्तः भैरवार्चनात् भैरवीं घोरां यातनां नानाविधां कारयित्वा परेता भुक्त्वा ततः शुद्धां मां प्रपद्यन्ते। ये चांतर्गृहे रंतो
मूत्रं पुरीषं वा विसृजंति मोहाद्भ्रमेण वा ते ममैवांतस्था नो: कुर्वंति तत्सर्वमनंतयातनाबीजमेव भवति। यदा मूत्रं रेत
:पुरीषं वा विसृजंत्यंतर्गृहे तदानेन ते सिचंते पितृन् नूनमेव पापकारिणं मज्जं परस्य नीललोहितो भैरवसंप्राप्त्यत्य
स्त्रमंडलेज्वलज्ज्वलन्कुंडेषु नेषु पितृतास्त्वा प्रमादेन निवसेत्काश्यां लिंगरूपिण्यां लिंगरूपिण्यामिति इति बृहज्जा
बालेऽविमुक्तवैभवप्रकाशोनाम तृतीयः खंडः सद्योजाताय विद्महे महादेवाय धीमहि तन्नो घोरः प्रचोदयात्
इति भस्मगायत्री सिद्धं ब्रह्म परं ज्योतिः स्वयमानंदविग्रहः वियदादिमहाभूतविज्ञातत्वेन भासते य इमा
मुपनिषदं ब्राह्मणो वा क्षत्रियो वा नित्यमधीते अश्रोत्रियः श्रोत्रियो भवति अनुपनीत उपनीत उपनीतो भवति।
स सर्वैरनुध्यातो भवति स सर्वेषु वेदेष्वधीतो भवति सोऽग्निपूतो भवति स वायुपूतो भवति स सत्यपूतो भवति स स

र्वेपूतोभवतिससर्वैर्देवैर्ज्ञातोभवतिनद्वाणात्सर्वेषुतीर्थेषुस्नातोभवतिसर्वैः क्रतुभिरिष्टंभवति अथकालाग्निरुद्रः
प्रोवाचयोगध्यानानांशिवएकोध्येयः शिवार्वमन्यत्परित्यज्येनामधीतब्राह्मणोवाक्षत्रियोवागर्थवासान्भुव्यनइत्योरतं
अथकालाग्निरुद्रः प्रोवाचसकृज्जप्त्वाशुचिःपूतःकर्मण्योभवतिद्वितीयंजप्त्वागाणपत्यमवाप्नोतितृतीयंजप्त्वादेवमे
वानुप्रविशतीत्योंसत्यमोंतत्सत्यम् भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राःस्थिरैरंगैस्तुष्टुवांसस्तनू
भिर्व्यशेमदेवहितंयदायुः स्वस्तिनइंद्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनो
बृहस्पतिर्दधातु ॐ शांतिःशांतिःशांति इतिबृहज्जाबालोपनिषद्विज्ञनरतापनीयोपनिषत्समाप्ता॥ श्रीः भद्रंश्रां
तिः ॐ अथकालाग्निरुद्रोपनिषदःसंवर्तकोग्निर्ऋषिरनुष्टुप्छंदःकालाग्निरुद्रोदेवताश्रीकालाग्निरुद्रप्रीत्यर्थेजपेवि
नियोगः अथकालाग्निरुद्रंभगवंतंसनत्कुमारःपप्रच्छअधीहिभगवन्त्रिपुंड्रविधिसतत्त्वंकिंद्रव्यंकियत्स्थानंकति
प्रमाणंकारेखाःकेमंत्राःकाःशक्तयःकिंदैवतंकिंफलमितितंहोवाचभगवान्कालाग्निरुद्रःयद्द्रव्यंतदाग्नेयंभस्म

सद्यादिपंचब्रह्ममंत्रैः परिगृह्यअग्निरितिभस्मेत्यनेनचाभिमंत्र्यमानस्तोकइतिसमुद्धृत्यजलेनसंसृज्यत्र्यंबकं
यजामहइतिशिरोललाटवक्षःस्कंधेषुत्रिभिस्त्र्यायुषैस्त्र्यंबकैस्तिर्यक्तिस्रोरेखाःप्रकुर्वीतव्रतमेतच्छांभवंसर्वे
षुवेदेषुवेदवादिभिरुक्तंभवतितस्मात्तत्समाचरेन्मुमुक्षुर्नपुनर्भवायाथसनत्कुमारप्रमाणमस्यत्रिधाचरेखाल
लाटादाचक्षुषश्चाभ्रुवोर्मध्यतश्चयास्यप्रथमारेखासागार्हपत्यश्चाकारोरजोभूर्लोकस्वात्माक्रियाशक्तिरृग्वेदःप्रातः
सवनंमहेश्वरोदेवतेतियास्यद्वितीयारेखासादक्षिणाग्निरुकारःसत्वमंतरिक्षमंतरात्माचेच्छाशक्तिर्यजुर्वेदोमाध्यंदिन
ंसवनंसदाशिवोदेवतेतियास्यतृतीयारेखाआहवनीयोमकारस्तमोद्यौर्लोकःपरमात्माज्ञानशक्तिःसामवेदस्तृ
तीयसवनंशिवोदेवतेतित्रिपुंड्रंभस्मनाकरोतियोविद्वान्ब्रह्मचारीगृहस्थोवानप्रस्थोवासमहापातकोपपातकेभ्यः
पूतोभवतिससर्वान्देवान्ध्यातोभवतिससर्वैर्देवैर्ज्ञातोभवतिससर्वेषुतीर्थेषुतीर्थेषुस्नातोभवतिससततंरुद्रजापी
भवतिसकललोकाभुंक्तेदेहंत्यक्त्वाशिवसायुज्यमितिनसपुनरावर्ततेनसपुनरावर्ततइत्याहभगवान्कालाग्नि

का॰ग्नि॰
४५

रुद्रोयस्त्वेतद्वाधीते सोप्येवमेव भवतीत्यांसत्यमित्युपनिषत् ॥ इति कालाग्निरुद्रोपनिषत्समाप्त भद्रं॰ शांतिः ॐ
म् अथाश्वलायनो भगवंतं परमेष्टिनं परिसमेत्योवाच अधीहि भगवन्ब्रह्मविद्यांवरिष्ठां सदासद्भिः सेव्यमानां निगू
ढां ययाचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषमुपैति विद्वान् तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगदवेहि
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशंति वेदांतवि
ज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ते ब्रह्मलोकेषु परांतकाले परामृतात्परिमुच्यंति सर्वे विविक्त
देशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः अत्याश्रमस्थः सकलेंद्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य हृत्पु
ण्डरीकं विरजं विशुद्धं विचिंत्य मध्ये विशदं विशोकं अचिंत्यमव्यक्तमनंतरूपं शिवं प्रशांतममृतं ब्रह्मयोनिं तथादिम
ध्यांतविहीनमेकं विभुं चिदानंदमरूपमद्भुतम् उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं ध्यात्वा मुनिर्गच्छ
ति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् । स ब्रह्मा स शिवः सेंद्रः सोक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स का

४५

लाग्निः सचंद्रमाः सएवसर्वंयद्भूतंयच्चभव्यंसनातनंमृत्युमत्येतिनान्यः पंथाविमुक्तये।सर्वभूतस्थमात्मानंसर्वभूता
निचात्मनिसंपश्यन्ब्रह्मपरमंयातिनान्येनहेतुना।आत्मानमरणिंकृत्वाप्रणवंचोत्तरारणिंध्याननिर्मथनाभ्यासात्पाशंद
हतिपंडितः सएवमायापरिमोहितात्माशरीरमास्थायकरोतिसर्वंस्त्र्यन्नपानादिविचित्रभोगैः सएवजाग्रत्परित
प्तिमेति स्वप्नेसजीवः सुखदुःखभोक्तास्वमाययाकल्पितविश्वलोके।सुषुप्तिकालेसकलेविलीनेतमोभिभूतः सुखरूपमे
ति पुनश्चजन्मांतरकर्मयोगात्सएवजीवः स्वपितिप्रबुद्धः पुरत्रयेक्रीडतियश्चजीवस्ततस्तुजातंसकलंविचित्रंआधा
रमानंदमखंडबोधंयस्मिंल्लयंयातिपुरत्रयंच एतस्माज्जायतेप्राणोमनः सर्वेंद्रियाणिचखंवायुर्ज्योतिरापः पृथि-
वीविश्वस्यधारिणीयत्परंब्रह्मसर्वात्माविश्वस्यायतनंमहत्सूक्ष्मात्तरंनित्यंतत्त्वमेवत्वमेवतत् जाग्रत्स्वप्नसुषुप्त्या
दिप्रपंचंयत्प्रकाशतेतद्ब्रह्माहमितिज्ञात्वासर्वबंधैः प्रमुच्यते त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयद्भवेत्तेभ्योविल
क्षणः साक्षीचिन्मात्रोहंसदाशिवः॥ मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितंमयिसर्वंलयंयातितद्ब्रह्माद्वयमस्म्य

कैवल्य०

५२

46

हमु। अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विचित्रं पुरातनोहं पुरुषोहमीशोहं हिरण्मयोहं शिवरूपमा।
स्मि। अपाणिपादोहमचिंत्यशक्तिः पश्याम्यचक्षुः सशृणोम्यकर्णः अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदा
हं वेदैरनेकैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहं न पुण्यपापे मम नास्ति नाशो न जन्म देहेंद्रियबुद्धिरस्ति न भूमिरापो
न मम वह्निरस्ति न चानिलो मेस्ति न चांबरं च। एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयं। समस्तसाक्षिं सदसद्विही
नं प्रयाति शुद्धं परमात्मरूपं। यः शतरुद्रियमधीते सोग्निपूतो भवति सुरापानात्पूतो भवति ब्रह्महत्यात्पूतो भवति कृत्या
कृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेत् अनेन ज्ञानमाप्नोति संसारार्णवनाशनं त।
स्मादेवं विदित्वैनं कैवल्यफलमश्नुते कैवल्यं फलमश्नुत इति इति कैवल्योपनिषत्समाप्ता भद्रं कर्णेभि० ॐ शांतिः
भद्रं० शांतिः ॐ देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन्को भवानिति सोब्रवीदहमेकः प्रथममासं वर्तामि च भ
विष्यामि च नान्यः कश्चन मत्तो व्यतिरिक्त इति सोंतरादंतरं प्राविशद्दिशश्चांतरं संप्राविशत् सोहं नित्यानित्यो व्यक्ताहं ब्र।

५२

स्याहं प्राचः प्रत्यंचोहं दक्षिणांचउदंचोहमधश्चोर्ध्वं च दिशश्च प्रतिदिशश्चाहं पुमानपुमांस्त्रियश्चाहं सावित्र्यहं गायत्र्य
हं त्रिष्टुब्जगत्यनुष्टुप्चाहं छंदोहं गार्हपत्योहं दक्षिणाग्निराहवनीयोहं सत्योहं गौरहं गौर्यहं ज्येष्ठोहं श्रेष्ठोहमापोहं तेजो
हमृग्यजुःसामाथर्वांगिरसोहमक्षरमहं क्षरमहं गुह्योहमरण्योहं पुष्करमहं पवित्रमहमग्रे च मध्यं च बहिश्च पु
रस्ताद्दशदिक्ष्ववस्थितमनवस्थितं च ज्योतिरित्यहमेकः सर्वे च मामेव मां यो वेद स सर्वान्देवान्वेद गां गोभिर्ब्राह्म
णान् ब्राह्मण्येन हवींषि हविषायुरायुषा सत्यं सत्येन धर्मं धर्मेण तर्पयामि स्वेन तेजसा ततो देवा रुद्रं नापश्यंस्ते देवा
रुद्रं ध्यायंति ततो देवा ऊर्ध्वबाहवः स्तुवंति यो वै रुद्रः स भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः यो वै० यश्च विष्णुस्त० मः यो
वै० यश्च महेश्वरस्त० मः यो वै० याचोवातः मः यो वै० यश्च विनायकस्त० मः यो वै० यश्च स्कंदस्त० मः यो वै रु० यश्चेंद्र
स्त० मः यो वै० यश्च स्कंदस्त० मः यो वै रु० यश्चेंद्रस्त० मः यो वै० यश्चाग्निस्त० मः यो वै० या च भूस्त० मः यो वै० यश्च भु
वस्त० मः यो वै० यश्च सुवस्त० मः यो वै० यश्च महस्त० मः यो वै० यश्च जनस्त० मः यो वै० यश्चगास्त० मः यो वै० यश्च स

अथर्व
५७
57

संत॰मः योवै॰यावत्पृथिवीत॰ मः योपि॰यास्वापस्त॰म॰योवै॰यस्त्वंतेजस्त॰मः॥ योवै॰यस्त्ववायुस्त॰मः योवै॰यस्त्वा
काशंत॰मः योवै॰यस्त्वसूर्यस्त॰मः॥योवै॰यस्त्वसोमस्त॰मः॥योवै॰यानिनक्षत्राणित॰मः योवै॰यचाष्टौग्रहास्त॰मः योवै
॰यस्त्वप्राणस्त॰मः योवै॰ यस्त्वप्राणस्त॰मः योवै॰ यस्त्वकालस्त॰सः योवै॰यस्त्वयमस्त॰मः योवै॰यस्त्वमृत्युस्त॰मः॥यो
वै॰यस्त्वामृतंत॰म ः॥योवै॰यस्त्वभूतंभव्यंभविष्यत॰मः योवै॰ यस्त्वविश्वंत॰मः॥योवै॰ यस्त्वकृत्स्नंत॰मः योवै॰यस्त्वस
र्वंत॰मः॥योवैरुद्रःसभगवान्यस्त्वसत्यंतस्मैवैनमोनमः ओमादौमध्येभूर्भुवः सुवरंतेशीर्षंजनरोविश्वरूपोसित्र
ह्मैकंत्वंद्वित्रिधोर्ध्वमधश्चत्वंशांतिश्चत्वंपुष्टिश्चत्वंतुष्टिश्चत्वंहुतमहुतंविश्वमविश्वंदत्तमदत्तंकृतमकृतंपरमपरंपरा
यणंचेतिअपामसोमममृताअभूमानग्मज्योतिरविदामदेवान्‌ किंनूनमस्मान्कृणवदरातिः किमुधूर्तिरमृतमर्त्य
स्यसर्वजगद्धितंवाएतदक्षरंप्राजापत्यंसूक्ष्मंसौम्यंपुरुषमग्राह्यमग्राह्येणवायुंवायव्येनरसोमंसौम्येनग्रसति
स्वेनतेजसानस्मादुपसंहर्त्रेमहाग्रासायवैनमोनमः हृदिस्थादेवताःसर्वाहृदिप्राणेप्रतिष्ठिताः हृदित्वमसियो

५७

संतिस्रोमात्राः पुरस्तु सः तस्योत्तरतः शिरोदक्षिणतः पादौ य उत्तरतः स ओंकारो य ओंकारः स प्रणवो यः प्रणव
स सर्वव्यापी यः सर्वव्यापी सोनंतो योनंतस्तत्तारं यत्तारं तत्सूक्ष्मं यत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत्पर
ं ब्रह्मेति। स एक स एको रुद्रः स ईशानः स भगवान्स महेश्वरः स महादेवः अथ कस्मादुच्यत ओंकारो यस्मादुच्चा
र्यमाण एव सर्वं शरीरमुर्ध्वमुन्नामयति तस्मादुच्यत ओंकारोथ कस्मादुच्यते प्रणवो यस्मादुच्चार्यमाण एव ऋचो
यजूंषि सामान्यथर्वांगिरसश्च यज्ञे ब्रह्म ब्राह्मणेभ्यः प्रणामयति तस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाण एव सर्वा
न्लोकान्व्याप्नोति स्नेहो यथा पललपिंडं शांतमूलमोतप्रोतमनुप्राप्य व्यतिशिष्टस्तस्मादुच्यते सर्वव्यापि अथ कस्मादु
च्यतेनंतो यस्मादुच्चार्यमाण एवाद्यंतं नोपलभ्यते तिर्यगूर्ध्वमधस्तात्तस्मादुच्यतेनंतो यकस्मादुच्यते तारं यस्मादुच्य
ते तारं यस्मादुच्चार्यमाण एव गर्भजन्मजरामरणसंसारमहद्भयात्तारयति तस्मादुच्यते तारमथ कस्मादुच्यते सू
क्ष्मं यस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा परशरीराण्येवाधितिष्ठति तस्मादुच्यते सूक्ष्ममथ कस्मादुच्य

अथर्व.
५८
48

तेसूक्ष्ममथकस्मादुच्यते शुक्लं यस्मादुच्चार्यमाणएव क्लंदते क्लामयते तस्मादुच्यते शुक्लमथकस्मादुच्यते वैद्युतं य
स्मादुच्चार्यमाणएवं व्यक्ते महति तमसि सर्वं शरीरं विद्योतयति तस्मादुच्यते वैद्युतमथकस्मादुच्यते परंब्रह्म यस्मादुच्चार्य
माणएव बृंहयति तस्मादुच्यते परंब्रह्माथकस्मादुच्यत एकोयः सर्वान्लोकानुत्का तिसृजति सृजति विसृजति वि
सृजति विसृजति वासयति तस्मादुच्यत एकोथकस्मादुच्यत एकोरुद्रः एकोरुद्रो न द्वितीयाय तस्थे तुरीयमिमं
लोकमीशानईशनीयुर्जननीयुः प्रत्यङ्जनास्तिष्ठति संयुगस्यांतकाले संसृत्य विश्वा भुवनानि गोप्ता तस्मादुच्यत
एकोरुद्रोथकस्मादुच्यत ईशानोयः सर्वांल्लोकानीशत ईशनीभिर्जननीभिः परमशक्तिभिरभित्वा शूर नोनु
मो दुग्धा इव धेनवः ईशानमस्य जगतः सुवर्दृशमीशानमिंद्रतस्थुषस्तस्मादुच्यत ईशानोथकस्मादुच्यते भगवा
न्यः सर्वान्भावानीक्षत्यात्मज्ञानं निरीक्षयति योगं गमयति तस्मादुच्यते भगवानथकस्मादुने महेश्वरो यः सर्वांल्लो
कान्संभक्षः संभक्षयत्यजस्रं सृजति विसृजति वासयति तस्मादुच्यते महेश्वरोथकस्मादुच्यात्मज्ञानयोगेश्व

यैमस्तितिमहीयतेतस्मादुच्यतेमहादेवः तदेतद्रुद्रचरितं एषोहदेवःप्रदिशोनुसर्वाःपूर्वोहजातःसउगर्भेअंतःस
एवजातःसजनिष्यमाणः प्रत्यंजनास्तिष्ठतिविश्वतोमुखः विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतवि
श्वतस्पात् संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः तदेतदुपासितव्यंवाग्वदंतितदंतुस्महणम
यंपंथाविततःउत्तरेणयेनदेवायनऋषयोयेनपितरःप्राप्नुवंतिपरपरायणंचेति। वालाग्रमात्रंहृदयस्यमध्ये
विश्वंदेवंजातवेदंवरेण्यंतमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषां योयोनिंयोनिमाधितिष्ठत्ये
कोयेनेदंपंचविधंचसर्वंतमीशानंपुरुषंदेवमीड्यंनिध्यायानारंशांतिमत्यंतमेति प्राणेष्वंतर्मनसोलिंगमाहुः यै
स्मिन्क्रोधोयाचतृष्णाक्षमाचतृष्णांछित्वाहेतुजालस्यमूलंबुद्ध्यासंचित्यंस्थापयित्वातुरुद्रे रुद्रएकत्वमाहुः रु
द्रंशाश्वतंवैपुराणं इषमूर्जंतपसानियच्छतव्रतमेतत्पाशुपतंअग्निरितिभस्मवायुरितिभस्मजल
मितिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्ममनइत्येतानिचक्षूंषिभस्मान्यग्निरित्यादिनाभस्मगृहीत्वाविमृज्यांगानिसं

स्पर्शोनस्माद्धुनमेनस्तत्पशुपतं पशुपाशविमोक्षाय योथर्वशिरं ब्राह्मणोधीते सोग्निपूतो भवति स वायुपूतो भवति
स आदित्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स सर्वपूतो भवति स सर्वैस्तीर्थेषु स्नातो भवति स सर्वे
षु वेदेष्वधीतो भवति स सर्ववेदव्रतचर्यासु चरितो भवति स सर्वैर्देवैर्ज्ञातो भवति स सर्वयज्ञक्रतुभिरिष्टवान्भव
ति तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति गायत्र्याः शतसहस्रं जप्तं भवति प्रणवानामयुतं ज
प्तं भवति रूपे रूपे दश पूर्वान्पुनाति दशोत्तरान्नाचक्षुषः पंक्तिं पुनातीत्याह भगवानथर्वशिरोथर्वशिरः सकृज्जप्त्वा शु
चिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणपत्यमवाप्नोति तृतीयं जप्त्वा देवमेवानुप्रविशती सोसत्यं यो रुद्रो अग्नौ यो अ
प्स्वन्तर्य ओषधीर्वीरुध आविवेश य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्तु अध मूर्द्धानमस्य संसी
व्याथर्वा हृदयं च यन्मस्तिष्कादूर्ध्वं प्रेरयत्पवमानोधि शीर्षतः तद्वाथर्वणः शिरो देवकोशः समुब्जितः तत्प्राणो
अभिरक्षतु श्रियमन्नमथो मनः श्रियमन्नमथो मनो विद्यामन्नमथो मनो विद्यामन्नमथो मनो मोक्षमन्नमथो मनो मो

क्षमन्तमथोमनः इतिअथर्वशिरोपनिषत्समाप्ता। भद्रंकर्णेभिः० शान्तिः ॐ अथहैनंपैप्पलादोंगिराः सनत्कु
मारश्चाथर्वणमुवाच भगवान्किमादौप्रयुक्तंध्यानंध्यायितव्यंकिंतद्ध्यानंकोवाध्याताकश्चध्येयः सएभ्योथर्वाप्र
त्युवाच। ॐमित्येतदक्षरमादौप्रयुक्तंध्यानंध्यायितव्यमोमित्येतदक्षरं परंब्रह्मास्यपादाश्चत्वारोवेदाश्चतुष्पादिद
मक्षरंपरंब्रह्मपूर्वास्यमात्रापृथिव्यकारः सऋग्भिरृग्वेदोब्रह्मावसवोगायत्रीगार्हपत्योद्वितीयान्तरिक्षंसउकारः
सयजुर्भिर्यजुर्वेदोविष्णूरुद्रास्त्रिष्टुब्दक्षिणाग्निस्तृतीयाद्यौः समकारः ससामभिः सामवेदोरुद्रआदित्याजगत्याह
वनीयोयावसानेस्यचतुर्थ्यर्धमात्रासोमलोकओंकारः सार्थर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोग्निर्मरुतोविराडेकर्षि
र्भास्वतीः स्मृताप्रथमारक्तपीतामहद्ब्रह्मदेवत्याद्वितीयाविद्युमतीकृष्णाविष्णुदेवत्यातृतीयाशुभाशुभाशुक्लारुद्र
देवत्यायावसानेस्यचतुर्थ्यर्धमात्रासाविद्युमतीसर्ववर्णापुरुषदेवत्यासएषह्योंकारश्चतुरक्षरश्चतुष्पाद० श्चतुः
शिरश्चतुरर्धमात्रः स्थूलमेतद्ध्रस्वदीर्घप्लुतमिति ॐम् ॐम २ ॐम २ इतित्रिरुक्त्वाचतुर्थः शान्तआत्माप्लुत

अथर्व
५०

प्रयोगेण समस्तमोमितिप्रयुक्त आत्मज्योतिः सकृदावर्तितेसकृदुच्चारितमात्रऊर्ध्वमुन्नामयतीत्योंकारः प्राणा
न्सर्वान्प्रलीयतइतिप्रलयः प्राणान्सर्वान्परमात्मनिप्रणामयतिनामयतीत्येतस्मात्प्रणवश्चतुर्धावस्थितइतिसर्व
देववेदयोनिः सर्ववाक्यवस्तुप्रणवात्मकम् १ देवाश्चेति संधत्ता सर्वेभ्यो दुःखभयेभ्यः संतारयतीति तारणात्ता
रः सर्वे देवाः संविशन्तीति विष्णुः सर्वाणि बृंहयतीति ब्रह्म सर्वस्यान्ते स्थानेभ्यो ध्यायिभ्यः प्रदीपवत्प्रकाशयतीति
प्रकाशः प्रकाशः प्रकाशेभ्यः सदोमित्यन्तः शरीरे विद्युन्मद्द्योतयति मुहुर्मुहुरिति विद्युद्वत्प्रती[illegible]दिशं भित्त्वा सर्वा
न्व्याप्नोति व्यापयतीति व्यापनाद्व्यापी महादेवः पूर्वास्य मात्रा जागर्ति जागरितं द्वितीया स्वप्नं तृतीया सुषुप्तं चतुर्थी
तुरीयं मात्रा मात्रा मात्रा प्रतिमात्रागताः सम्यक् समस्तानपि पादान्जयतीति स्वयंस्वयंब्रह्मा भवते परसिद्धिकर एत
स्माद्ध्यानादौ प्रयुज्यते सर्वकरणोपसंहारत्वाद्धार्यधारणाद्ब्रह्मत्वात्तुरीयं सर्वे करणानि मनसि संप्रतिष्ठाप्य ध्याने विष्णु
ःप्राणं मनसि सहकरणैः संप्रतिष्ठाप्य ध्यानात् रुद्रः प्राणं मनसि सहकरणैर्नादान्ते परमात्मनि संप्रतिष्ठाप्य ध्यायीतेशा

50

५०

नंप्रध्यायितव्यंसर्वमिदंब्रह्मविष्णुरुद्रेंद्राःसंप्रसूयंतेसर्वाणिचेंद्रियाणिसहभूतैर्नकारणंकारणानांध्याताध्या
ताकारणंतुध्येयःसर्वैश्वर्यसंपन्नःसर्वेश्वरश्शंभुराकाशमध्येध्रुवंस्तब्ध्वाधिकंक्षणमेकंक्रतुशतस्यापिचतुः
सप्तत्यायत्फलंतदवाप्नोतिकृत्स्नमोंकारगतिंचसर्वध्यानयोगज्ञानानांयत्फलमोंकारोवेदपरईशोवाशिवएको
ध्येयःशिवंकरःसर्वमन्यत्परित्यज्यसमाप्ताथर्वशिखेतामधीत्यद्विजोगर्भवासाद्विमुक्तोविमुच्यतइत्योंसत्यम्
॥ इतिअथर्वशिखोपनिषत्समाप्ता भद्रं॰ शांतिः ॐ म क्षुरिकांसंप्रवक्ष्यामिधारणांयोगसिद्धये यांप्राप्यन
पुनर्जन्मयोगयुक्तश्चजायते वेदतत्त्वार्थविहितंयथोक्तंहिस्वयंभुवा निःशब्दंदेशमास्थायतत्रासनमवस्थितः
कूर्मोंगानीवसंहृत्यमनोहृदिनिरुध्यच॥ मात्राद्वादशयोगेनप्रणवेनशनैःशनैः पूरयेत्सर्वमात्मानंसर्वद्वारा
न्निरुध्यच उरोमुखकटिग्रीवंकिंचिद्धृदयमुन्नतम् प्राणान्संधारयेत्तस्मिन्नासाभ्यंतरचारिणः भूत्वातत्रगतः
प्राणःशनैरथसमुत्सृजेत् स्थिरमात्रादृढंकृत्वाअंगुष्ठेनसमाहितः द्वेगुल्फेतुप्रकुर्वीतजंघेचैवत्रयस्त्रयः द्वे

आजानुजंघोरुभ्यांगुदेशिश्नेत्रिकस्य च: वायोरायतनंचात्रनाभिदेशेसमाश्रयेत्॥ तत्रनाडीसुषुम्नातुनाडीभिर्बहुभि
र्वृता॥ अणुरक्ताश्चपीताश्चकृष्णास्ताम्राविलोहिता: अतिसूक्ष्मांचतन्वींचशुक्लांनाडींसमाश्रयेत्॥ ततःसंचारयेत्प्राणा
नूर्णनाभीवतंतुना॥ ततोरक्तोत्पलाभासंपुरुषायतनंमहत् दहरंपुंडरीकंतद्वेदांतेषुनिगद्यते तद्भित्वाकंठमाया
तितांनाडींपूरयन्यत: मनसस्तुक्षुरंगृह्य सुतीक्ष्णंबुद्धिनिर्मलम् पादस्योपरिमर्मंयत्तद्रूपंनामकृंतयेत् मनोद्वा
रेणतीक्ष्णेनयोगमाश्रित्यनित्यश: इंद्रवज्रइतिप्रोक्तंमर्मजंघानुकीर्तनम् तद्ध्यानबलयोगेनधारणाभिर्निकृ
तयेत्॥ ऊर्वोर्मध्येतुसंस्थाप्यमर्मप्राणविमोचनम्॥ चतुरभ्यासयोगेनछिंदेदनभिशंकित: ततःकंठांतरेयोगी
समूहन्नाडिसंचयम् एकोत्तरंनाडिशतंतासांमध्येवरास्मृता॥ इडारक्षातुवामेनपिंगलादक्षिणेनतु तयोर्मध्येवरं
स्थानंयस्तंवेदसवेदसर्ववित् सुषुम्नातुपरेलीनाविरजाब्रह्मरूपिणीह्यासमंतिवाडीषुनैतिलम् छिंद्यंतेध्यान
योगेनसुषुम्नैकानछिद्यतेयोगनिर्मलधारेणक्षुरेणामलवर्चसाछिंदेन्नाडीशतंधीर:प्रभावादिहजन्मनि जाती

पुष्यसमायोगैर्यथावास्यं जितैर्जितम् एवं शुभाशुभैर्भावैः सा नाडी तां विभावयेत् तद्भाविताः प्रपद्यंते पुनर्जन्म
विवर्जिताः ततो विदेतचित्तचित्तस्तु निःशब्दं देशमास्थितः निःसंगः सर्वयोगज्ञो निरपेक्षः शनैः शनैः पाशं छित्वा
या हंसो निर्विशंकः खमुत्क्रमेत् छिन्नपाशस्तथा जीवः संसारं तरते तदा यथा निर्वाणकालेतु दीपो दग्ध्वा लयं व्रजेत् त
था सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत् प्राणायामसुतीक्ष्णेन मात्राधारेण योगवित्॥ वैराग्योपलघृष्टेन छि
त्वा तं तु न बध्यते छित्वा तं तु न बध्यत इति इति क्षुरिकोपनिषत्समाप्ता भद्रं॰ शांति॥ ॐम् अष्टपादं शुचिं हंसं त्रि
सूत्रं मणिमव्ययम् द्विवर्त्मानं तेजसैद्धं सर्वः पश्यन्न पश्यति भूतसंमोहने काले भिन्ने तमसि वैश्वरे अंतः पश्य
ति सत्वस्थं निर्गुणं गुणगह्वरे अशक्यः सोन्यथा द्रष्टुं ध्यायमानः कुमारकः विकारजननीं मायामष्टरूपामजां ध्रुवा
म् ध्यायते ध्यासिता तेन तन्यते प्रेरिता पुनः सूयते पुरुषार्थं च तेनैवाधिष्ठिता पुरा गौरतादवती सा तु जनित्री
भूतभाविनी असिता सितरक्ता च सर्वकामदुघा विभो पिबंत्येनामविषयमसंख्याताः कुमारकाः एकस्तु

चूलीको॰ पिबन्तेदेवाःस्वच्छंदेनवशानुगः ध्यानक्रियाभ्यांभगवान्भुंक्तेसौप्रथमंविभुः सर्वसाधारणीदोग्ध्रीमाप्यमानां
तुयज्वभिः पश्यंतस्यांमहात्मानःसुपर्णंपिप्पलाशनम् उदासीनंध्रुवंहंसंस्नातकाध्वर्यवोहये शंसंतमनुसंयां
तिबह्वृचाःशास्त्रकोविदाः रथंतरेबृहत्साम्निसप्तवैतैस्तुगीयते मंत्रोपनिषदेब्रह्मपदक्रमसमन्वितं पठंतिभार्गवा
ह्येतेदथर्वाणोभृगूत्तमः १ सब्रह्मचारीव्रात्यस्तुस्कंभोथपलितस्तथा अनड्वान्रोहितोच्छिष्टःपठ्यतेबहुविस्तरे
कालःप्राणश्चभगवान्मृत्युःपुरुषएवच॥ शर्वोभवश्चरुद्रश्चस्थावाम्बुःसासुरस्तुयो प्रजापतिर्विराट्चैवपार्थि
ःसलिलएवच स्तूयतेमंत्रसंयुक्तैस्थैर्वैविदितैर्विभुः तंषड्विंशकमित्येकेसप्तविंशंतथापरेपुरुषंनिर्गुणंसांख्यम
थर्वशिरसोविदुः चतुर्विंशतिसंख्याकमव्यक्तंव्यक्तदर्शिनं अद्वैतंद्वैतमित्याहुस्त्रिधातंपंचधातथाब्रह्माद्यंस्था
वरांतंचपश्यंतिज्ञानचक्षुषः तमेकमेवपश्यंतिपरिशुद्धंविभुंद्विजाः॥ तस्मिन्सर्वमिदंप्रोतंब्रह्मस्थावरजंगमम् त
स्मिन्नेवलयंयांतिस्रवंत्यःसागरेयथा यस्मिन्भावाःप्रलीयंतेलीनाश्चाव्यक्ततांययुः नश्यंतिव्यक्ततांभूयोजायंते

५२

52

५२

बुद्बुदाइव क्षेत्रज्ञाधिष्ठितंचैवकारणेव्योंजपेद्बुधः एवंसहस्रशोदेवंपर्यस्यंतंपुनःपुनः यएवंश्रावयेद्द्वा
द्ब्राह्मणोनियतव्रतः अक्षय्यमन्नंपानंचपितॄणांचोपतिष्ठते ब्रह्मब्रह्मविधानं तुयेविदुर्ब्राह्मणादयः
तत्रैवतेलयंयांतिलीनास्याब्रह्मण्यापिमेलीनास्याब्रह्मण्यपिनइति २ इत्यथर्ववेदेचूलिकोपनिषत्समाप्ता
ओं योगशिखांप्रवक्ष्यामिसर्वज्ञानेषुचोत्तमां यदातुध्यायतेमंत्रंगात्रकंपोथजायते आसनंपद्मकंब
ध्वायच्चान्यदपिरोचते कुर्यान्नासाग्रदृष्टिंचहस्तौपादौचसंयतो मनःसर्वत्रसंगृह्यओंकारंतत्रचिंतये
त् ध्यायेत्सततंप्राज्ञोहृत्कृत्वापरमेष्ठिनम् एकस्तंभेनवद्धारेत्रिस्थूणेपंचदैवते ईदृशोतुशरीरेवासमतिमा
नुपलक्षयेत् आदित्यमंडलंदिव्यंरश्मिज्वालासमाकुलम् तस्यमध्यगतोवह्निःप्रज्वलेद्दीपवर्तिवत् दीपशि
खायांयामात्रासामात्रापरमेष्ठिनः।भिंदंतियोगिनःसूर्येयोगाभ्यासेनवैपुनः द्वितीयंसुषुम्नाद्वारंपरिशु
द्धंविसर्पति कपालसंपुटंभित्वाततःपश्यंतितत्परम् अथनद्ध्यापयेज्जंतुटालस्यात्प्रमादतः यदित्रि

योगशि॰

कालमावर्त्तेत्स गच्छेत्परमं पदम् ॥ एतद्रयमेतत्समासाद्य संक्षेपात्कथितं मया । लब्धयोगेन बोद्धव्यं सन्नं परमेष्ठि
नम् जन्मांतरसहस्रेषु यदा नाश्नाति किल्बिषं तदा पश्यंति योगेन संसारछेदनं परं संसारछेदनं परमिति ॐ
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः स्व
स्तिन इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ॐ
शांतिः शांतिः शांतिः ॥ इति योगशिखोपनिषत्समाप्ता ॥ ॥श्रीगुरुभ्यो नमः ॥ ॥

53

५३

53

१८७८ — १८७६

८३ योगसिद्धोपनिषध

१०००